अथहायनरत्नप्रारभ्यते॥

हा॰ श्रीगणेशायनमः श्रीगुरुचरणकमलेभ्योनमः ॐगणाधिपंरामगुरोःपदाब्जद्वन्द्वंदामोदराख्यपितरञ्चनत्वा प्राचीनपद्ये वै

२ भट्टोनामाकरोतिसद्धोयनरत्नसंज्ञं १ भागीरथीतीरविराजमाने श्रीकान्यकुब्जेनगरेतिरम्ये अभूद्भरद्वाजमहर्षिवंशे श्रीब्राह्म

१ मागणाकोष्णधामा २ तस्यात्मजाः पञ्चबभूवुरेषां श्रीदेविदासः प्रथमो बभूव अन्येचपश्चाच्छ्रीपतिपद्धतौचटीकांसुधा

गणाम्पतुष्टै ३ तस्मात्त्रघुःखेटविचारदक्षः प्रख्यातकीर्तिर्विजितारिपक्षः श्रीसोमदैवज्ञगणो यततः कनिष्ठोनारायणोस्मत्कुल

पटिष्ठः ४ न्यायेमसुराजपूजितनिभोवेदान्तिनामग्रणीर्मीमांसादिसमस्तशास्त्रकमलप्रोद्बोधनेभास्करः श्रीमद्भूपतिवृन्द

पूजितपदोभूदेवमूर्द्धामणिः श्रीमन्मिश्रचतुर्भुजस्समभवत्तस्मात्त्रघुर्द्धर्मवित् ५ तस्मात्त्रबुस्सकलशास्त्रकलापपाठदामोद

रस्समभवत्कृतिनाम्वरिष्ठः योभास्करोदितपितामहकर्मतुल्यांहनिमद्धान्त्रितपमांकृतिनोहिताय ६ दामोदरस्यतनयोज्ञा

तोबलभद्रवृत्तिरामोबलभद्रेणचकिञ्चित्प्रकाश्यतेताजिककौस्तुभपर्ण्णा ७ निबन्धाश्चिताः पूर्वैस्संहिता ताजिकादिषु न

हायनफलेतस्मान्निबन्धंकर्त्तुमुद्यतः ८ हिल्लाजखत्तखुत्तायारिविन्धिरोमकसम्मतम् सारंसमरसिंहस्यक्रियतेवार्षिकंफलं

म् ननुकिमभिधेयकमिदंशास्त्रम्प्रयोजनञ्चकिम् उक्तञ्च ज्ञातार्थंज्ञातसम्बन्धंश्रोतुंश्रोताप्रवर्तते ग्रन्थादौतेनवक्तव्यः

सम्बन्धस्सप्रयोजनइति अन्यच्च सर्वस्यैवहिशास्त्रस्यकर्म्मणोवापिकस्यचित् यावत्प्रयोजनन्नोक्तन्तावत्तत्केनगृह्यते इत्यु

3736

ते यवनाचार्येण पारसीभाषया प्रणीतं ज्योतिःशास्त्रैकदेशरूपं वार्षिकादिनानाविधफलादेशफलकं शास्त्रं ताजिक
शब्दवाच्यम् तदनन्तरसंभूतैः समरसिंहादिभिरधीतव्याकरणैर्ब्राह्मणैस्तदेव शास्त्रं संस्कृतशब्दोपनिबद्धं तदपि ताजि
कशब्दवाच्यमेव अत एवैतैस्तत्र तत्र इक्कवालादयो यावन्त्यः संज्ञा उपनिबद्धाः अत्र ग्रहराशिस्वरूपयोगसहम
सहमवर्षफलभावविचारदशाविभागगमनागमनाद्यनेकप्रस्तरूपास्ताजिकपदार्थाः प्रतिपाद्यन्तेनं विषयस्तु ... षा
पदार्थानां ताजिकग्रन्थस्य च प्रतिपाद्यप्रतिपादकभावः संबंधः प्रयोजनञ्च भूतभविष्यवर्तमानशुभाशुभफलकथना
म् उक्तं च नारदेन प्रयोजनं तु जगतः शुभाशुभनिरूपणमिति अत्र शास्त्रे तु वर्षफलप्रश्नादिजिज्ञासुरधिकारी संबन्धा
स्मरणस्य उक्तं च वशिष्ठेन अध्येतव्यं ब्राह्मणैरेव तस्माज्ज्योतिःशास्त्रं पुण्यमेतद्रहस्यम् एतद्बुद्ध्वा सम्यगाप्नोति त
स्मादर्थं धर्मं मोक्षमाग्र्यं यशश्चेति ननु यवनाचार्यप्रणीते इक्कवालादिपारसीशब्दात्मकस्य ताजिकशास्त्रस्याध्यय
नमेव नो वदनभिहितम् अध्ययनं तु दूरादपास्तमेव उक्तं च स्मृतौ न वदेद्यावनीं भाषां प्राणैः कण्ठगतैरपीति तन्मूलम
त्वात्तदमरसिंहादिशास्त्रस्याप्यध्ययनमनुचितं मूलाशुद्ध्या सर्वमशुद्धमिति न्यायात् अत्रोच्यते यवनाचार्यस्याष्टा
दशसंहिताकर्तृषु परिगणितत्वात्तद्वचः प्रमाणमेव उक्तं च कश्यपेन सूर्यः पितामहो व्यासो वशिष्ठोऽत्रिः पराशरः कश्यपो

नारदोगर्गोमरीचिर्मनुरङ्गिरा लोमशःपौलिशश्चैवच्यवनोयवनोभृगुः शौनकोऽष्टादशाश्चैतेज्योतिःशास्त्रप्रवर्तकाः
काइति तथाच यवनाचार्यप्रणीतंसंस्कृतोपनिबद्धं जातकशास्त्रं यवनजातकाख्यन्दृश्यतेतथैवब्रह्मेणास्म
शास्त्रपारम्पर्यवशेनताजिककृतंत्वमप्यस्मत्स्मर्यते उक्तञ्चरोमकेन ब्रह्मणागदितम्भानोर्भानुनायवनायप्रत
चयवनेनतत्ताजिकंतत्प्रकाशितमिति अन्येपिताजिकाचार्या उक्ताः टोडरानन्दे खवनेस्थजोरोमकश्चहिल्लाजोधियणा हृ
उमुरखोत्तर्यैतेतेताजिकस्यप्रवर्तकाइति अथचज्योतिःशास्त्रफलम्पुराणकेदेश्यइत्युच्यतेतिसिद्धान्त
त् तथाच कृतेपैतामहंशास्त्रन्त्रेतायामार्षवादरायणम् गार्गीयन्द्वापरे प्रोक्तंससत्येताजिकंकलाविति पाठ
क्तेः अथच म्लेच्छाहियवनास्तेषुसम्यक्शास्त्रमिदंस्थितम् ऋषिवत्तेपिपूज्यन्ते किम्पुनर्दैवविद्द्विज
वनज्योतिर्ग्रन्थानामध्ययनेहिज्ञानान्नदोषः अथयद्वा वकमल्लादेरीश्वरपूजादौत्यागस्स्यात्तथाभुञ्जे सर्वनि
मणिगृहमनादरस्स्यात् उक्तञ्चगणेशदैवज्ञैः ब्रह्मद्वेषितुतुच्छसंभवमिदंताजीयकंवर्ततेशास्त्रंयद्यपिसंहिते
रपितथाप्यध्येतुमर्हम्भवेत् यस्माद्यत्सदसत्फलन्निगदितंसत्यंहिकिम्पङ्कजेराजापङ्कभवानयाफ
त्रिमरौदूषणमिति हिल्लाजेनतुब्रह्मविष्णुउद्भवमुखनिर्गतशापेनयवनताम्प्राप्तेनश्रीसूर्यसोवर्यनेशास्त्रप्रणा

नाहि जानामपि सूर्यसिद्धान्त वत्तदध्ययनं युक्तमित्युक्तम् केशवविष्णुमुखनिर्गतशापान्ते [illegible]धिगतं त्रिस्मम[illegible]
वेः रोमकेच पुरिलिख्यमशेषन्नहि जातिभिरनोध्ययनीयमिति पुररोमकपत्तने यदा च तदेव प्रमेयं केनोचित्तु [illegible]
स्मरसिद्धादिनान्याधीनं तदीयं ज्योतिश्शास्त्रेण दृष्टनरसंस्कारादव्यक्तसंज्ञापरिभाषेण संस्कृतशब्दे रूपनिबद्धत्वे
त्यज्यते तदानकोपि दोष इति ज्ञेयम् नवदेद्यावनीभाषामेतद्वचनं सुयावनीयकाव्यालंकारादिविषयकमिति सिद्धां।
न्तः ननु सूर्यसिद्धान्तादिग्रन्थास्तु श्रौतस्मार्तनैककर्मविषयकाः कथमस्य ताजिकशास्त्रस्य श्रौतस्मार्तनैककर्म[illegible]ति
च्यते अष्टवर्षं ब्राह्मणमुपनीयपयेत् षष्ठेऽन्नाद्यकाम इति तथा अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी [illegible]
ह्यलोकं सावित्र्योहि गौरी ददेदित्यादिभिर्वाक्यैरुप नयनविवाहकालान्यनेके [illegible]हिनास्तेषां ज्ञानं स्फुटितिनाजि[illegible]शा
स्त्रे[illegible]न्यते अन्यच्च उक्तकालेपि गुरुशुद्धिं विनायथोपनयनविवाहावुत्सर्गतो न भवतस्तथा जन्मकालान्न[illegible]
षेष्वरिष्टसंभवेपि न भवतो दुष्टफलस्यतुल्यत्वादिति ननु सद सत्फलावबोधार्थमस्ति ताजिकशास्त्रस्य प्र[illegible]ता
जिकशास्त्रोक्तवर्षप्रवेशो जन्मकालाधीनस्तदंगीकारे च जातकशास्त्रादेव नृणां सदसत्फलबोधो भविष्यति किमनेन ता
जिकशास्त्रेणेत्यत्रोच्यते जातकशास्त्रात्सदसद्ज्ञानवत्त्वे यासं साध्यं बहुकालसाध्यं नास्ति नह्याहि जनक[illegible]

हा॰ नीनंस्पष्टग्रहानंगीकृत्यदृष्टिषड्बलेष्टकष्टबलानिसर्वग्रहाणामायुर्वर्षाणिचानीयततोदशामंतर्दशांचनिर्णीयज्ञानकुर्या
र॰ त्वोदितंसदसत्फलंवाच्यम् तत्रापिइष्टकष्टबलाश्रयगुणकानयनेसच्छेदगणितस्यदशाप्रवेशेजन्मकालिक
३ नवत्वात्रस्येत्यादिगणितस्यचंज्ञानंसिद्धांतविदामेवनयादृशानांतर्दशानाम् अन्यच्चएवमत्यायासेनानीतानां
दशान्तर्फलविवेकं कर्तुमशक्यः कथमायुःकृतंयेनहियन्नदेवेत्यादिवराहोक्तेग्रहायुर्वर्षाणांदशवापत्वदशे
विंशतिरित्यादीनांवहूनांवर्षाणांसत्वात्तत्रहूहसम्बन्धिशुभाशुभदशाफलंनानाकालमध्येनैकरूपंसम्भवति अंत
र्दशानामपिवर्षाणांपञ्चकं षट्षट्कमवासकेकस्यसमायाति तत्रापिनैकरूपमन्तर्दशाफलं सूक्ष्मदशा
सुचकस्यचिदल्पवर्षत्वं कस्यचिद्बहुवर्षत्वंसमायाति तत्रापिनैकरूपफलंतावत्कर्तुंशक्यते तस्मा
नापिजातकफलस्थूलकालफलदमस्ति ताजिकेतुवर्षमध्येसर्वेषांग्रहाणांदशाःसमायान्ति स्वजन्म
ल्पदिनाद्यासमायाति तत्रमासप्रवेशफलमत्यन्तसूक्ष्मतरंसमायात्यतस्सदसत्फलज्ञानन्ताजिकशास्त्रा
वनितान्तकान्तम् उक्तञ्चसमरसिंहेन प्रायोनजातकफलेचिरकालप्रयोज्यमतिस्फुरतिपुंसां तेनात्रह्युपपा
फलम्प्रकाशयते ताजिकप्रोक्तमिति ननुप्राचीनकर्मरूपस्यदैवस्यावश्यम्भावित्वात्कथमुद्यमोवर्षफलविचा

सः॥ यदाह शौनकः॥ विना तु यत्नात्प्रयत्नस्य विधानं सुरेशासचिवोऽपि यस्मात्सान्निपतिज्ञस्तोऽपि न शक्तोऽन्यथा कर्तुमिति न च [illegible]
दैवस्यैव बलवत्त्वे पुरुषकारो निरर्थक इति अत्राहुः किं यदि दैवमेव फलं तदा कृष्याद्युपायेन पुरुषकाररूपो [illegible]
त् अथ च श्रुतिस्मृत्यावेदितविधिनिषेधाश्च निरर्थकाः स्युः तदाह केशवार्कः फले यदि प्राक्तनमेव तत्किं कृष्याद्युपायै-
षु परः प्रयत्नैः श्रुतिस्मृतिभ्यामपि नृणां निषेधविध्यात्मके कर्मणि किं निषस्येति अपि च जन्मान्तरार्जितं [illegible] पु-
रुषाकारं विना न घटत इति पुरुषार्थस्यैव मुख्यत्वम् तथा च वसन्तराजः पूर्वजन्मजनितं पुराविदः कर्म दैव[illegible]
न्यत् चास्य ते उद्यमेन तदुपार्जितं तदा वांछितं फलं ति नैवं केवलमिति अथ पुरुषार्थस्यैव मुख्यत्वाङ्गीकारे [illegible] कृतस्य पा-
पविभागस्याप्रतीकारो भवेद्यदि तदाहुः रैवेर्नवाध्येर [illegible] सत्याम युधिष्ठिराः नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि।
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभमित्यादिवाक्यानां का गतिरिति चेदत्रोच्यते तत्र कर्मणां वैचित्र्यं कानिचिद् [illegible]
तिकानि निबिडच्छिथिलमूलानि यत्र जन्मपत्रशकुनवर्षप्रश्नादिभिर्दशाफलं दृष्टं [illegible] प्रतिबंधकेन संतानादि विद्याद्यभावे [illegible]
नस्तु त्रग्रहशान्त्यादिरूपेण प्रयत्नेनापि संतानादि प्रतिबंधकीभूतं दृढमूलत्वान्निवारयितुं न शक्यते यत्र तु ग्रहचारवशेन
गोचरादिना संतानादि प्रतिबंधो निर्णीतस्तच्छिथिलमूलत्वेन स्वल्पयत्नादिनोत्पाद्यम् उक्तं च स्मृतौ हन्यते दुर्बलं दैवं पौ-

हा०
२०
४

शुषेणविपश्चितेति एवंशुभसूचकदशापाककालेक्रियमाणयात्राविनायासेनफलसाधिका अशुभदशायांहानिर्दिष्टा
तोविशेषंज्योतिःशास्त्रगणनोपयोगः पूर्वोक्तशौनकादिवाक्यानिदृष्टसूलकर्मविषयकानिदेवपुरुषकारयोःसाचिव
मुक्तम् याज्ञवल्क्येन यथाह्येकेनचक्रेणरथस्यनगतिर्भवेत् एवंपुरुषकारेणविनादैवंनसिद्ध्यति [illegible]संक्षेपाज्ज्योति
श्शास्त्राध्यायनेफलमाहमाण्डव्यः एवंविधस्यश्रुतिनेत्रशास्त्रस्वरूपभर्तुःखलुदर्शनेनैव निहन्त्यशेषंकलुषंजनानां
दूतनधर्मसुखास्पदंस्यात् १ सूर्यसिद्धान्तेपि दिव्यंचक्षुर्ग्रहर्क्षाणांदर्शितंज्ञानमुत्तमम् विज्ञायार्कादिलोकेषुस्थानंप्रा
प्नोतिशाश्वतमिति ज्ञानविशेषेणज्योतिर्विदःपूजातारतम्यंजीर्णारम्भधायि दशादिनकृतंपापंहन्तिसिद्धान्तवि
त्त्रिदिनजनितदोषंतन्त्रविद्दृष्टएव करणभगणवेत्ताहन्त्यहोरात्रदोषं जनयतिद्युनेमंचस्तत्रनक्षत्रसूचीति[illegible]
चीलक्षणंवराहसंहितायां अविदित्वैवयःशास्त्रंदैवज्ञत्वंप्रपद्यते सपंक्तिदूषकःपापोज्ञेयोनक्षत्रसूच[illegible]
त्तिनजानन्तिग्रहणान्नैवसाधनम् परवाक्येनवर्तन्तेनतेनक्षत्रसूचकाः आह्निगणकानामपाङ्क्तेयत्वंधर्मशास्त्रेनक्षत्रस
चिकाभिप्रायेणज्ञेयम् उक्तंच वशिष्ठेन त्रिस्कन्धपारङ्गमएवपूज्यः श्राद्धेसदाभूसुरवृन्दमध्ये नक्षत्रसूचीखलुपापरू
पोहेयस्सदासर्वसुधर्मकृत्ये इतिनन्वस्मिन्ग्रन्थेग्रन्थबाहुल्यमेवदूषणमितिचेन्नयतोग्रन्थसंक्षेपे[illegible]न्यायेसावि

वारसंशयश्चभवति नत्वत्र विस्तारे संशयापेक्षयोरभावो भवति तस्माद्ग्रन्थविस्तारेण न दोषायेति ज्ञेयम् उक्तन्त्वयापूर्वे।
न संक्षेपे संशयापेक्षे स्यातान्तु स्यातामसंशयः वरीयान्विस्तरस्तस्मादपेक्षासंशयापह इति अलमतिप्रसङ्गेन प्रकृतमनु
सरामः अथ राशिस्वरूपमुक्तन्त्ववाम ननताजिके फलं राशिग्रहाधीनं सर्वेषाम्प्राणिनां यतः अतो मेषादिराशीनां स्वरू
पम्प्राङ्ग्रि रूप्यते मेषो वृषोथ मिथुनं कर्कसिंहोथ कन्यका तुलाततो वृश्चिकश्च धनुर्मकर एव च कुम्भो मी[illegible] विप्रोक्ता
वुधैर्द्वादशराशयः मेषोथ मिथुनं सिंहस्तुला धनुरथो घटः विज्ञेया विवुधैरेते क्रूराः षडपि राशयः २ वृ[illegible]स्तथा।
कन्या वृश्चिको मकरस्तथा मीनश्चैते षडपि च विज्ञेयाः सौम्यराशयः मेषकर्काविथ तुला मकरश्चरराशयः वृषसिंहौ
वृश्चिकोथ कुम्भश्च स्थिरराशयः मिथुनं कन्यका धन्वी मीनश्च द्विस्वभावकः मेषोथ वृषभः सिंहो परार्द्धं च धनुस्त
था मकरश्च वुधैर्ज्ञेया राशयो मीच चतुष्पदाः कर्कटो वृश्चिकश्चैवोभौ बहुपादौ प्रकीर्तितौ कुम्भमीनावुभौ राशी विज्ञेयौ [illegible]
वर्जितौ मिथुनश्च तुला कन्या पूर्वार्द्धं धनुषस्तथा राशयो द्विपदाः प्रोक्ता यवनाचार्यसूरिभिः मेषश्च सिंहधनुषो [illegible]मा
वह्निराशयः वृषः कन्याथ मकरस्सूरैर्भूमिराशयः मिथुनश्च तुला कुंभो राशयः पवनात्मकाः कर्कवृश्चिकमीनाश्च वि
ज्ञेया जलराशयः अर्द्धशत्रुमृगः कुंभः कन्याद्येते चराशयः तुलालिकर्कमीनाश्च विज्ञेयाः शब्दवर्जिताः मेषो वृषोथ मि

हा॰
र॰
५

पुनः सिंहः शब्दान्वितो धनुः कर्कालिमीनावह्रस्व पत्याजिम्बोस्य घटकाः स्मृताः मध्या सिंहेरलकन्याजतुलोन्त्यापार्सेथ्यूल्प
काः सूक्ष्माः सिंहधनुर्मेषाः पीतोत्स्पापि नधातवः वृषकन्यामृगानूत्सा उत्सशीताश्चवातुलाः युग्मकुंभतुलाउल्ला स्नि
ग्धांगास्तुल्य धातवः कर्कमीनाल्पः स्निग्धाः शीताश्च श्लेष्म धातवः नृपविट्शूद्रभूदेवास्तयापूर्वादिकादिशः
त्रिः परिवर्तनविज्ञेयाः विबुधैः सदाएष्टोदयाः कर्कमृगधनुर्मेषवृषान्त्यमीशेषाः शीर्षोदयाज्ञेयाउभयश्चझषः स्मृतेः शीर्षोदया
दिनवलाः शेषा रात्रिवलाः स्मृताः राशेः स्वनंदभागोयः सतुवर्गोजमाहन्त्व पड्इति अथराशिवर्णानाहसमरसिंहः
अनुरागसितहरितपाटलधूसरविपांडुरविचित्राः सितिहेमद्युतिपिंगाः कर्वूरबभ्रुस्यघजादिवर्णाः स्युरितिं अथराशिबवि
षमोदयत्वसमोदयत्वमुक्तं समरसिंहेनैव विषमोदयामृगाद्याः षट्ह्रस्वत्वेनकालमानस्यकर्काद्याः षट्दीर्घत्वात्समो
दयान्यजतुलेचसमानेयद्यपिस्वल्पासमेदेशे कालस्यह्रस्वदीर्घत्वंनसंभवति तथापिवह्रस्वसमेदेशेनसंभवतीत्युदीया
यत्त्वास्माहादशांगुलाः तत्रमकरादीनामुदयपलानिम २८३ कुं २३मी १५८मे १५८ वृ २०३मि २८३ कर्कादीनामुदयप
लानिचक ३६३ सिं ३९५ क ३९८ तु ३९८ वृ ३९५ ध ३६३ अत्रमकरादितः कर्कादीनामुदयपलानिवह्न्व धिकानि
तिज्ञेयं एषांप्रयोजनमाह समरसिंह स्वदृहृतासमोदयोदयानांराशीनांमध्यगोविधुवृद्धिं यदिंपातितदाहृद्धिवेषे।

स्याद्धन्यथा ज्योनिरिति मेषादिराशीनां संज्ञान्तरमुक्तं वराहेण क्रियताबुरिजितुमकुलीरलेयपाथोनजूककौर्प्याख्याःऔ

क्षिकस्याकोकेरोहृद्रोगश्चान्त्यभं चेत्थं केंद्रादिसंज्ञा उक्तास्तेनैव कंटककेंद्रचतुष्टयसंज्ञा लग्नात्तराद्दशमचतुर्थानां संज्ञा

परतः पणफरमापोक्लिमसंज्ञितं च तत्परतः ग्रहाणां मूलत्रिकोणगृहाणि तेषैवोक्तानि सिंहोवृषः प्रथममस्य गृह याग

नौलिकं भास्त्रिकोणभवनानि भवंति सूर्यादीति इति राशिस्वरूपम् अथ राशिस्वरूपप्रयोजनम् तत्र हि प्रदे[illegible]दि

नरात्रिसंज्ञा राशिस्वरूपप्रयोजनं बुद्धस्य मारणभावफले ज्ञेयम् पुंस्त्रीराशिप्रयोजनम् पुंखेटाः पुंराशौ [illegible] स्त्री

ग्रहाः स्त्रीराशौ बलिन इति स्थानबलं ज्ञेयम् पित्तोष्णशीतादिप्रयोजनम् रोगकर्त्तो यत्र गुणाश्चावित्यादिषु भावविशेषेण ।

स्थितिर्ज्ञानार्थम् राशिदिक्प्रयोजनम् याम्यायादिग्ज्ञानार्थम् चरराश्यादिप्रयोजनं त्वरोदये भोजनमेकवारं स्यादि

भोजनविचारे ज्ञेयम् राशीनां जलादिचारित्वप्रयोजनं त्वाखेटके जलाखेटमाहुः सवीर्यैर्ग्रहैः सजलाख्यैरित्यनेके ज्ञे

यम् वह्न्यादिराशिप्रयोजनम् अष्टमभावो राशिरिव राशौ वह्निभयमित्यादिस्थले ज्ञेयं ब्राह्मणादिजातिक्रूरसौम्यत्वादि

प्रयोजनम् लग्नानुमानवसतो वयःप्रमाणं जातयो ज्ञेया इत्यादि समरसिंहोक्तं ज्ञेयम् यथा मम अस्मिन् वर्षे

केन लाभो भविष्यति इति विचारे लाभभावलग्नसमवर्णेन तत्क्रूरसौम्यादिप्रकृतिसहितेन तत्समस्तानेकतत्त्व

हो· मवृद्धजन्मकेनतत्समवर्णादिकवस्तुलाभोवाच्यः इतिराशीस्वरूपप्रयोजनम् अथग्रहस्वरूपं उक्तंचयादवेन रविविधुसि
र· तिजोबुधवाक्पतीभृगुशः नीचतमश्शिखिनोग्रहाः नचसदाभ्रमणाद्गगणेनृणाम् ददतिधातुसमम्फलमुक्तवरिति वाप्यमो
६ पि ख्यादयोग्रहास्सन्नसदसत्फलदायकाः मुन्याफलविशेषस्यज्ञानार्थेराहुरष्टमइति ग्रहस्वरूपमुक्तंत्रैलोक्यमेकादशे भा
र्गवेन्दूजलचरौज्ञजीवौग्रामचारिणौ राहुस्सितिजमन्दार्कान्तुवन्ते ऽरण्यचारिणः प्रभातमिन्दुजगुरू मध्याह्नेरविभूमिजौ
अपराह्णेभार्गवेन्दूसन्ध्यामन्दभुजङ्गमौ पित्तप्रभाकरक्ष्माजौश्लेष्मोभार्गवशीतगू ज्ञगुरूसमधातूच पवनौराहुमंदौ कु
जार्कौ कटुकौजीवामधुरस्तुवरोबुधः सारास्त्रौचंद्रभृगुजौनीरसौसूर्यार्कनंदनौ ॥ स्थूलइंदुःसितःखेटुस्थू
लरस्त्वेकुजोल्पगूः वर्तुलौसौम्यधिषणौदीर्घौशनिभुजंगमौ खण्डोर्द्धचंद्राकारः विप्रौशुक्रगुरूराज्ञीकुजार्कौ[illegible]इंदु
वैश्यस्स्मृतौ म्लेच्छौसैंहिकेयशनैश्चरौ रक्तवर्णःकुजःप्रोक्तोधियराःकनकद्युतिःशुकपिच्छसमस्सौम्योगौरःकांति[illegible]सु
मंदारार्कस्यपुष्पेणसमद्युतिरयोस्मगुः कविरत्यंतधवलःफणीकृष्णः शनिस्तथा अवनीशोदिनमणिस्तपस्वीरोहिणीप्रियःस्व
र्णकारःक्षितेःपुत्रोब्राह्मणोरोहिणीभवः वणिग्गुरुःकविर्वैश्योवृषलस्सूर्यनंदनः सैंहिकेयोनिषादश्चसर्वकार्येषुसम्मता बु
वाकुजशिशुसौम्यश्शशिशुक्रौचमध्यमौ मार्तंडमंददेवेज्यफणिनःस्थविराग्रहाः जीवमंगलमार्तंडास्तुशन्निपुंरुषाबुधाः

सोमसोमजमंदाहि भृगुपुत्राहि योषितः शुक्रे चंद्रे भवेद्रौप्यं बुधे स्वर्णमुदाहृतम् गुरौ रत्नयुतं हेम सूर्ये मौक्तिकमुच्यते भौ
मे त्रपुः शनौ लोहं राहावस्थीनि कीर्त्तयेत् ग्रहाणां क्रूरसौम्यत्वमुक्तं वामनेन जीवेंदुसौम्यशुक्राः स्युः सौम्याः क्रूरा ग्रहाः परे
क्षीणेंदुः क्रूरयुक्तो ज्ञो राहुः क्रूराः प्रकीर्तिताः त्वग्मांसरोमा मंदोथ मज्जास्थ्नो भास्करप्रभुः कुजो रक्तस्य भार्गवो मेदसः शशी र
विः शुक्रो धरासूनुः स्वर्भानुः सूर्यनन्दनः चंद्रो बुधः सुरगुरुः प्रागादिदिगधीश्वराः सूर्येंदुजीवाः सत्वाख्या ज्ञशुक्रौ [illegible]
स्वर्भानुभौमरविजास्तमोगुणमयाः स्मृताः विनष्टादि ग्रहलक्षणमाह चण्डेश्वरः क्रूरदृष्टोथ युतो वापि क्रूराक्रांतो वि[illegible] स
विनष्टो भवेत्खेटो विस्तारोत्र निरूप्यते राहुणाक्रान्तदेहौ नो दिवाकरनिशाकरौ जितः क्रूरेण यः खेटः समराशिस्थितोपि।
वा. पापाक्रान्तस्स निर्दिष्टस्समांशे क्रूरसंयुतः अन्तरालविहीनो यो दृष्ट्या पश्यति पूर्णया सज्ञेयः पापसंदृष्टो रश्मिहीनोर्क।
मध्यगः अथ ग्रहस्वरूपप्रयोजनम् तत्र ब्राह्मणादिजातिज्ञानं वृद्धत्वादिवयोज्ञानं ग्रामादिनिवासज्ञानं [illegible]नादिप्रकृति
ज्ञानं चतुरस्राद्याकृतिज्ञानम् पुमान्स्त्री चेति ज्ञानं प्रयोजनं ममकार्यमस्मिन्वर्षे केन भविष्यतीति प्रश्ने दर्शलग्नेशसमजा
त्यादिकेन वर्षेशसमजात्यादिकेन वा मनुष्येण वा कार्यं ज्ञेयम् कटुकादिरसज्ञानम् तुर्यस्थखेटवसति भोज्यान्ने[illegible]
शेदित्याद्युक्तं स्वर्णादिद्रव्योक्तिर्वर्षेशबलग्रहस्य द्रव्यलाभो निर्बलग्रहस्य द्रव्यहानिरित्याद्यर्थं प्रभातादिकालोक्ते भोजनः

हा॰ विचारे कालज्ञानार्थम् ग्रहवर्गप्रयोजनम् वर्षे सबलग्रहवर्गे वस्तुलाभो निर्बलग्रहवर्गे वस्तुहानिरेतज्ज्ञानार्थमयं ह

१॰ वमन्यदपि ज्ञेयम् इति ग्रहस्वरूपम् अथ वर्षप्रवेशवेलानयनम् तत्साधनमुक्तं यादवेन शकोवर्तमानोजनुः शकहीनो

७॰ गताब्दा भवेयुस्ते चतुर्धा निधेयाः भुवारवाराचंद्रे १५ रिलारामतुल्ये ३१ नभोष्टावके ३१ स्ताडितास्ते विधेयाः जन्मवार घटि

कापलयुक्ताः षष्ट्युपर्य्युपरिगं दिवसाद्यं सप्तमशेषकमिदं दिनपूर्वो स्वागता भवति हायनवेला अत्रैव सुगमोपायउक्तो दै

वज्ञचक्रचूडामणिभिरस्मद्गुरुज्येष्ठभ्रातृभिः श्रीमन्नीलकण्ठदैवज्ञैः गताः समाः पादयुताः प्रकृतिघ्नसमागरगात् खवे

दाप्त ४० घटीयुक्तां जन्मवारादिसंयुताः अब्दप्रवेशो वारादि सप्तनष्टेत्र निर्दिशेत् प्रकारान्तरमुक्तं ग्रहज्माभरणे इष्टः शकोज

न्मशकेन हीनस्त्रिधा सपादो दलितश्च सार्द्धयुक्तस्तथा जन्मगवारपूर्वैः स्फुटा भवेद्दृनिवेशवेला इति एवं वर्षे [illegible]

शान्ताजिककर्तृभिरनेकप्रकाराभिहितास्ते प्रयोजनाभावाद्ग्रन्थबाहुल्यभयाच्च न लिख्यन्ते अथात्र त्रिजन्मनी [illegible]

योगे विशेष उक्तस्ताजिकालंकारे निशि जन्म भवेद्यदा तदागतवारादिकमत्र संयुतं दिनमानयुतं क्षपाघटीपलपूर्वैरिह।

वासरो गत इति यद्वा रात्रिजन्मनि वर्षसंघोत्थघटीषु रात्रिगतघटिका योज्यास्तत्र वर्षलग्नस्पष्टीकरणं सषड्भसूर्यात्

नेव्यं यतो गतघटिकाः सूर्यास्ताद्याता इति अथवा वर्षसंघोत्थघट्यादिमिष्टकालं प्रकल्प्य स जन्मलग्नं रविषड्भकल्प्यल्ल

गनंतद्वर्षप्रवेशलग्नं भवति एवं सकलगणकसार्वभौमश्रीमद्रामदैवज्ञाः प्रविद्यैर्मोहशैरनेकैर्विशेषाः कर्तुं शक्यंते परं ग्रं
विस्तरभयाद्गुद्योगः अत्रेदं ध्येयं यद्दिचैत्रादेरनंतरमपि मीनार्के जन्म तदा पूर्ववर्षशक एव जन्मशकः प्रकल्प्यः एवं जन्मा
र्कसमभानुश्चैत्रादेरूर्ध्वं मेषादेः प्राग्भवति तदा प्रागब्दशक एवाभीष्टशकः प्रकल्प्यः मेषादेरूर्ध्वं त्वग्निमशक एव ज्ञेयः अ
थाधिमाससंभवे कदाचिदेवं द्विवर्षमध्ये द्विवारं जन्मार्कसमभानोः संभवेन वर्षद्वयोत्थवारादिवैलक्षण्यापत्तेः सि
नमपि गतसमासाम्यान्न स्यात् एवमधिमाससहितवर्षादग्निमवर्षे कदाचिच्चांद्रवर्षमुल्लंघ्यापि जन्मार्कसमभानौ
जाते सत्येकवर्षे वारादिसमं वारादेरंतरं च स्यात् तस्मात्सौरवर्षादौ शकप्रवृत्तिर्ज्ञेयेति अत्र जन्मार्कतुल्यो रविर्यस्मिन्मासे
भवति तस्मिन्नेव मासे वर्षप्रवेशो ज्ञेयः उक्तं च तिथ्यादिपत्रे जन्मनार्कतुल्यो रविर्भवेद्यत्र स एव मास इति तत्र जन्मा
र्कसमो रविर्यदि जन्ममासे नायाति परे पूर्वे वा मासे आयाति तदा जन्ममास एकरहित एकयुक्तो वा कर्तव्य इति अथ
वर्षध्रुवकोपपत्तिः अत्र वर्षादिः साध्यस्तत्र सौरमेव उक्तं च सिद्धांतशिरोमणौ वर्षायनर्तुयुगपूर्वकमत्र सौरादिति
अथ रवेश्चक्रभोगोऽर्कवर्षप्रदिष्टमिति तेनैव तत्त्वाद्द्विभगणभोगेन सौरवर्षो भवति तस्य तस्य प्रगतेष्वब्देषु नवत्सौर
वर्षादिः कदा भविष्यतीति जिज्ञासायामुत्पत्त्युपलब्ध्या जन्मकालीनसूर्यतुल्यः सूर्यो यस्मिन् दिने तत्र भगणभोगस्य जातत्वा

हा. र. ८

हर्षादिज्ञानस्तस्य ज्ञाने उपायः यद्येकस्य सौरवर्षैः कस्य सावनादिनानि लभ्यन्ते तदैकेन किमिति प्राप्ता एकस्मिन्वर्षे सतेभ्यावि
नाद्याः ३६५।१५।३१।३० वारस्यैक्यपेक्षितत्वादुपरि सप्ततष्टाः जाताः ०।१५।३१।३० अत्रानुपातः यद्येकस्मिन्वर्षे एते सावना
द्याः तदाभुक्तायुर्वर्षैः किमिति अंत्रगतवर्षाणि अनेन ध्रुवकेन ०।१५।३१।३० चतुर्षु स्थानेषु गुणयानि रूपेणाभाज्यानि फलं
ञ्जन्मसमयादारभ्य सावनदिनानीति अस्मिन् जन्मवारादियोगस्तु वर्षप्रवेशीयदिवसघटीपलज्ञानार्थं क्रमः अत्र पलघटी
भ्यः षष्ट्या ऊर्ध्वेऽर्द्धे योजनेन पलघटीनां षष्ट्याधिकत्वाभावात्क्रमत्वाप्तस्यैवात्र सप्ततष्टमित्युक्तम्. एवं कृतेनास्मिन्सा
वयवे दिने वर्षादिः स्फुटो भवतीत्युपपन्नम् अथैकवर्षप्रवेशादग्निमाब्दादिप्रवेशज्ञानम् भू १ वांगविधु १५ भूराम ३१ ख्वाग्नि
३० वारादिकेन युक्त वर्षमासदिनावेशोऽग्निमस्स्यात् स्थिरीशयुगिति ननु सौरवर्षात्सावनचान्द्रनाक्षत्रबार्हस्पत्यवर्षाणामभा
वे कथं सौरमानेनैव वर्षप्रवेशोऽभिहितः तत्रोच्यते चान्द्रसावनवर्षयोस्तु सूर्यस्य चंद्रस्य वा साम्याभावात्त्यागः बार्हस्पत्यमा
नेन जन्मकालिकराश्यादिमध्यमगुरुरगाभीष्टबार्हस्पत्यवर्षे यद्यपि गुरोरंशसाम्यं भवति तथापि राशिसाम्याभावात्त्यागः ना
क्षत्रवर्षांते यद्यपि चंद्रसाम्यं भवति तथापि ग्रहाणां सास्य ग्रहाणां तेजोदातुश्च रवेः सौरवर्षे राश्यंशकलाविकलासाम्याद
थ वर्षापनं तु युगपूर्वकमत्र सौरादिति सिद्धांतोक्ते यावान्जन्मनि भानुरित्यादि जीर्णताजिकोक्तेश्च सौरमानेनैवाब्दप्रवेशकरणं

उक्तम् अथच मासे द्वादशभिर्वर्षमिति सूर्यसिद्धान्तोक्तेर्वर्षभास्करत्वेन समावत्स्याद्मासफलमादिशेत्सुधीरिति जीर्ण।
ताजिकोक्तेश्च सौरमानेनैव मासप्रवेशोपि विधेयः ननु मासास्तथा च तिथयस्तु हिमांशुमानादिति सिद्धान्तोक्तेर्मासप्रवेशेष्वां
दुमासस्यैव मुख्यत्वमिति चेत्तन्न यथा सौरमासप्रवेशे सूर्यांशसाम्यं ज्ञापकं न तथा चान्द्रमासप्रवेशे किंचिदस्ति अथवा अधि
मासासंभवे त्रयोदशमासानां सत्वात्पूर्वोक्तसूर्यसिद्धान्तवचो लोकप्रसिद्धश्च व्याहन्येत तस्मात्सौरमानेनैव मासदिनप्रवेशा
दिकं विधेयमिति सिद्धान्तः अथ वर्षप्रवेशसमये स्वस्वाधीनसिद्धान्तकरणादिरीत्या साधितोर्को जन्मकालीनार्कराश्यवयवस
मो भवति इदमेव वर्षप्रवेशसमयप्रमाणम् उक्तं च समरसिंहेन यावान् जन्मनि भानुस्तावान् वर्षे स्फुटस्तथैवमपि श्रीमन्नी
लकण्ठज्योतिर्विद्भिरप्युक्तम् तत्कालार्को जन्मकालरविणा स्याद्यतस्तु समः इति एवं निष्पन्नस्याब्दप्रवेशकालस्य स्पष्टीकर
णमुक्तं हरिभट्टेन ताजिकसारे सूर्यो वर्षसमुद्भवो न हि भवेज्जन्मार्कतुल्यो यदा तत्त्याविहतत्तयोस्तु विवरं लब्धं च हीना
न्विते वर्षप्रवेशघटीपलेषु सततं वर्षार्के हीनाधिके जन्मोत्थद्युमणेर्हि वर्षसमयस्त्वेवम्भवेत्स्फुटमिति पार्थपुरनि
वासिगणेशदैवज्ञेनाप्युक्तं ताजिकभूषणे जन्मकालनलिनीविलासिना नैव याति तुल्यतां द्रुतमसौ चेत् वर्षकालन
लिनीपतिस्तयोरन्तरं इतिहतं युतोनितम् कार्यमब्दभुवे तस्माद सौस्यहः प्रजायत इति अत्र वर्षार्कजन्मार्कसाम्या।

हा· र· ८

भावात्कालस्पष्टीकरणमुक्तम् तत्रस्वाधीनकरणात्स्वदेशपूर्वापरयाम्योत्त ॥ रादिकर्मसंस्कृतोजन्मकालीनस्प
ष्टार्कस्तत्करणजातदेशान्तरादिसंस्कृतोवार्षिकस्पष्टार्कोजन्मार्कसमोवश्यम्भवति तदासाम्यन्तुखपुष्पायमानम् अत्र
भूलोकमेकाप्यज्ञानमात्मनोदूरीकरोत्वायुष्मान् एतद्गणितपूर्वकंसकलभूपालमूर्द्धमणिनीराजितचरणकमलेभ्यो
म्भूखण्डलाखण्डलानांश्रीसाहिसूजामहाप्रभूणाम्मासप्रवेशानयनेलिख्यते अतस्कालस्पष्टीकरणमयुक्तम् अ
थयदेवलुच्यतेपूर्वोक्तानुपातसाधितत्वात् कल्पमध्यमभगणोत्पसायनध्रुवेपिमह्वन्मध्यमस्तत्साधितवर्षकाल
स्यापिमध्यमत्वम्मध्यमस्पष्टीकरणमुक्तमेवेति तदपिनयतःसौरवर्षान्तेसमुपचयापचयसाम्येनमध्यमस्पष्टसाय
नयोस्तुल्यत्वात्सौरवर्षान्तःपातिसन्नतष्टसायनध्रुवस्पष्ट एव तत्साधितोह्यादिः सुतरांस्पष्टएवतस्पष्टस्यपुनस्पष्टी
करणन्नयुज्यते अतएवयावानजन्मनिभानुरितिपद्येनताजिककर्तृषुश्रेष्ठत्वानाभिषिक्तेनसमरसिंहेनवर्षकाल
स्पष्टीकृतिंविनैवस्पष्टार्कसाम्यमुक्तन्तुमध्यमार्कसाम्यम् अतएवहरिभट्टगणेशदैवज्ञकृतंकालस्पष्टीकरणं मयु
क्तम् इदम्पुनरिहावधेयम् प्रतिवर्षमेकाकल्पायनांशगतिरितिजन्मनोभूयसिकालेगतेऽयनांशवशेनोदयांतरंचरोऽ
न्तरयोर्वैलक्षण्यात्तत्संस्कृतस्तत्करणतन्नदेशान्तरादिसंस्कृतोपिवर्षार्कोजन्मार्कसमोनभवति तदर्थमनुपातेनान्तरा।

साध्यं तद्यथा यदि सूर्यस्य स्पष्टगतिकलाभिः षष्टिघटिकास्तदार्कोनरकलाभिः किमिति लब्धनाड्यादिना वर्षाद्वौ चालः संस्कार्य इति तस्मात्तत्करणाज्ज्ञानदेशान्तरभुजान्तरसंस्कृतो भीष्टाय नाशवशादुन्यन्तोदयान्तरेणान देशजपलभोत्यतात्कालिकचरेणाच संस्कृतो वर्षार्कौ जन्मार्कसमो यदि नस्यात्तदेवकालस्य स्पष्टत्वमन्यथा नेति सिद्धान्तः श्रीमन्नीलकण्ठदैवज्ञ सुस्वल्पान्तरत्वान्नोक्तमतो न कोपि दोषः अथ वर्षप्रवेशे तिथ्यानयनमुक्तं पद्धतिभूषणे समासमाजः शितिकराग्र ११ निघ्नः सम हि १६ भागेन समन्वितोस्य स्वजन्मतिथ्या चरवराम ३० नष्टस्तिथिर्भवेद्रू १ नयुता कदाचिदिति नक्षत्रयोगानयनमुक्तं ताजिकसारे व्योमेन्दुभिः १० संगुणितागताब्दाः स्वभून्यवेदाश्विं २४० स्तैर्विहीनाः जन्मर्क्षयोगैस्सहिता पृथक्स्थात्नक्षत्रयोगो भवतो भतष्टो २७ लग्नानयनमुक्तं पद्धतौ समासमाजस्त्रिगुणस्समानां दशांश १० शयुक्तो जनिलग्नयुक्तः सूर्यो १२ हृतः शेषसमं विलग्नं सामान्यतो मानतमेरगादीति अत्र तिथिनक्षत्रयोगा वर्षप्रवेशदिवसस्य प्रायो नेकस्ये नायाति उक्तं च सुधानिधौ निश्चयोत्र सदा ज्ञेयो वारात्सर्वत्र हायने तिथीभयोगयोज्ञेयमनुमानं भयोगयोरिति लग्नमपि कालेनैकस्पेसमायानीति ज्ञेयम् तत्र संक्रान्तिज्ञानार्थं दैवज्ञमुकुटालंकारस्य सकलगणकसार्वभौमानाम संद्गुरुचरणानां श्रीरामज्योतिर्विदाम्यथानि शाके द्वारसेषुमही १५२९ विहीने भिस्ते

ह्रा० सपादेदलितेचसार्द्धे खे० नाष्टवेदैः ४८ कृतिभिः २० क्रमेणयुतेदिनष्ठक्रियसंक्रमस्स्यात् अथैकस्मिन्मेषसंक्रान्तौश्री
१० नांपांनद्विमसङ्क्रान्तिज्ञानार्थंसूत्रम् दस्रो २ शैलशरा ५७ रसा ६ गुणायमा स्त्रीणि ३ द्वयं २ षट् ६ वियद्रामा ३० द्वौ २
१० स्वगुणा ३० कृतौ ४ रसशराः ५६ षट् ६ नागवेदा ४८ क्रमात् भूमिः १ सप्तदश १७ द्वयं २ रसगुणा ३६ वेदा ४ स्त्रयं ३
मार्गणा ५ स्त्रैषा ५३ वासरनाडिकास्तवजदिनाद्ये योजितास्युर्हेषात् अथसंक्रान्तितिथिज्ञानोपायः शाकेनाब्धिति
१५२६ सूनेतुंदे. ११ राम्रैगुरोषुभिः ५३ निघ्नोतुद्वाद्वितोरवाग्नि ३० नष्टोमेषाहृजास्तिथिः १ द्वि २ वेदा ४ गा ६ ८ दि १०
रुद्रा ११ युतास्यादन्यसंक्रमेद्वि २ द्वि २ द्वि २ द्वि २ भूमि १ वेदयुक्ताबुद्ध्याक्र
मात्पराइति अथवर्षप्रवेशेसंक्षिप्तपञ्चाङ्ग फलमुक्तंत्रैलोक्यप्रकाशे न
न्दा भद्राजयापूर्णाः शुभदास्तिथयोमताः द्वादश्याद्याश्चरिक्ताचनशुभाव
र्षवेशने १ सोमोबुधोगुरुःशुक्रोवारश्चत्वारउत्तमा भौमार्कशनिवारा
श्चवर्षेहानिभयप्रदाः २ अश्विनीमृगशीर्षश्चहस्तःपुष्यःपुनर्वसुः स्वा
तिश्चरेवतीचैववर्षवेशेशुभावहाः ३ कृत्तिकारोहिणीचार्द्राज्येष्ठामूलाख्यतारका श्रवणश्चानुराधाचमध्यमापूर्वौभैरात्रयेस

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी	राशि
०	०२	०६	०३	०६	०२	०४	०६	०१	०२	०४	०५	बार
०	५७	२३	०२	३०	३०	५६	४८	२७	३६	०३	५६	घटी
०	२	४	६	०	१०	११	११	१३	११	११	१३	ति.


भरणीचमघाचित्राविशाखाशततारका धनिष्ठाश्लेषिकाप्रोक्तावर्षवेशेतिनिंदिता विरुद्धयोगेविष्कुंभाचवर्षवेशोनशोभ-
नइति अत्रविशेषउक्तोदीपिकायां जन्मर्क्षेयुक्तायदिजन्ममासेयस्यध्रुवंजन्मतिथिर्भवेच्च भवन्तिनह्रासरसवनित्यंनैरु-
ज्यसौभाग्यसुखानितस्य कृतान्तकुजयोर्वारेयस्यजन्मदिनंभवेत् अनृक्षयोगसम्प्राप्तोविघ्नस्तस्यपदेपदे नक्षत्रस्या-
मनृक्षसंकृतान्तश्शनिः लग्नशुभाशुभफलमुक्तंहायनसुन्दरे शुभग्रहयुतेसौम्येवर्षेस्वामिदृशायुते रोगोद्वेगापदांनाशा-
शास्सुतदारादिसम्पदः देशभूम्यर्थलाभस्याद्वातामोक्तानृपप्रियः सौम्यश्चविपुलावृद्धिर्वर्षलग्नेशुभेशुभम् क्रूरवर्षे-
क्रूरयुक्तेक्रूरस्वामिदृशायुते रोगोद्वेगोभयन्दुःखंज्वरो हानिर्दरिद्रता राज्यभङ्गस्तथोदास्यंस्वबन्धुकलहंकुले स्थानभ्रं-
शमवाप्नोतिवर्षलग्नेशुभेशुभमिति अथवर्षप्रवेशेशुभाशुभफलज्ञानार्थंसमुद्रचक्रमुक्तंविस्तुयामले तिर्यगूर्ध्वगतारेखा
श्चतस्रस्ततस्सप्तरेखाः कृत्तिकादीनिऋक्षाणिपूर्वाद्येः सव्यमार्गतः मध्याश्चसागराख्यानास्तीरेसागरपार्श्वयोः चा-
त्वारश्चैताः कोणाः पूर्वादिविदिशिक्रमात् त्रित्रिभंसागरेदेयमेकैकंतीरकाष्टके कोणेद्विभन्द्विभमध्यादंशाभिसं
नितारकाः यत्रस्याज्जन्मनक्षत्रंततोवर्षफलंलभेत् मासास्तुवर्षाण्यासान्वदिनानिहिभवंतिवै दुःखंसमुद्रेसु खमेवतो
रेशैलेश्रियंसंलभतेमनुष्यः जन्मर्क्षयोगेचेदुवतीहवर्षेन्नत्रापिदुःखंकिलविस्तुतंत्रेइति अथवर्षप्रवेशेशुभाशुभफलं:

ज्ञानार्थे त्रिपताकचक्रमुक्तम्मुक्तावल्याम् रेखात्रयं तीर्यग्गश्चोर्द्ध्वसंस्थमन्योन्यविद्धाग्रगमेक
कोणांतु स्मृतं बुधैस्तत्त्रिपताकचक्रम्प्राङ्मध्यरेखाग्रगवर्षलग्नात् १ न्यसेद्ग्रहं चक्रं किलतत
त्रैकोणकाद्वा संख्याविभजेत्र भोगैः शेषोन्मितेजन्मगचन्द्रराशे स्तुल्येचराशौविलिखे
च्छशाङ्कम् २ पश्चात्तु भोजितशेषतुल्येस्थानेस्वराशौखचरास्तु लेख्याः स्वभोनुर्विद्धेहिमा
गौतु कष्टं तापोर्कविद्धे तुगिनात्मजेन ३ महीजविद्धेतुशरीरपीडाशुभैश्चविद्धेजयसौ
ख्यलाभः शुभाशुभव्योमगवीर्यतोत्रफलञ्च वर्षस्यवदेत्तु धीमान् ४ इति चक्रे मेषराशि
रुपलक्षणम् मेषस्थानेवर्षलग्नंज्ञेयम् अथात्र प्रसंगाद्वर्षशुभाशुभफलज्ञानार्थं स्वज

पर्वत पू॰उ	नीर आ	सागर मृ॰रा॰ह	नीर भ	पर्वत अ॰रे
नीर श्ले				नीर उ॰भा
सागर म॰पू॰उ		समुद्रचक्रम्		सागर प॰श॰पू
नीर हस्त				नीर श्रव
पर्वत वि॰स्वा	नीर चित्रा	सागर अ॰ज्ये॰मू	नीर पूर्वा	पर्वत उ॰अभि

न्मलग्नान्मेषसंक्रमणलग्नफलं प्रस्तवे स्तवोक्तं लिख्यते जन्मोदयाद्वादशराजप्रवेशलग्नं हि यद्भावगतेशुभान्वितम् त
द्भाववृद्धिम्प्रकरोतितस्मिन्वर्षेनृणाम्पापयुतन्तदन्यथा जन्मोदयेदेहसुखन्धनेर्थलाभस्तृतीयेचकुटुम्बवृद्धिः तुर्येस
हृत्सौख्यमथात्रे जाप्तिः पुत्रस्यषष्ठेरिपराजयस्स्यात् १ स्त्रीसौख्याप्तिर्भवतिमदनेमृत्युरुभिश्चरन्ध्रे धर्मार्थाप्तिस्तपसिदश
शमे वित्तसौख्यास्पदाप्तिः लाभेलाभसुखधनञ्चयोर्दुःखदारिद्र्यमन्ते पुंसांमेषप्रविशतिरवौजन्मलग्नाद्धिलग्नम् इति २

एतंत्फलंसौम्ययुतेज्ञेयम्पापयुतेसर्वंविपरीतम् मिश्रयुतेमिश्रंज्ञेयमिति मेषप्रवेशलग्नस्यजगल्लग्नेतिनामयवनाद्यैः



वर्षलग्नादपिजगल्लग्नविचारोदत्तकोयन्त्राधिकारे जन्मलग्नाद्वर्षलग्नाज्जगल्लग्नंयदाभवेत् अष्ट मे द्वादशेवापिसवर्षोनशुभावहः १ अन्योपिविशेषस्तत्रैव अष्टमेद्वादशेवापिभवेद्यन्तुरराशितः जगल्लग्नन्तदाहानिस्तन्नुरस्यनसंशयइति अथजन्मकालेयेनसिद्धान्तेनकरणेनवामकरन्दग्रविनोदादिसारणीग्रंथेनवाग्रहाः षट्कर्मसंस्कृतास्साधितास्तेनैववर्षप्रवेशेपिउदयान्तरादिषट्कर्मसंस्कृतास्स्पष्टाग्रहास्त गतिकास्साधनीयाः उक्तञ्चपद्धतौ अब्दप्रवेशेखचरास्सचाराः करणान्निजात् साधनीयाविलग्नञ्चस्पष्टंकार्यन्निजोदयैः १ तेग्रहास्स्पष्टाएव उक्तञ्चभास्कराचार्यैः नात्रविधौहोत्सवजातकादौखेटैःस्फुटैरेवफलंस्फुटत्त्वमिति अत्रादिशब्देनवर्षप्रवेशादौज्ञेयम् ताजिकसारेपि विनाग्रहैःस्पष्टतरैर्नैकिंचित्फलंप्रवक्तुन्नितरांक्षमस्यादिति अथब्रह्मसौरार्यादिपक्षाणांसत्त्वात्कस्मिन्पक्षेग्रहास्साध्या इत्युक्तन्त्वामोदरपद्धतौ यान्निसंसाधिताःखेटायेनदृग्गणितैक्यताम् तेनपक्षेणतेकार्यास्स्फुटास्तत्समयोद्भवा इतिनतुग्रहानयनमार्षशास्त्रादेवकर्तुंयुज्यते नतुमनुष्यात् तस्याऽयथार्थत्वादिचेन्नत्पद्रू

हा॰ नयनमुनिकृतशास्त्रादेवकृतेमुचितम् परन्तु तत्रापिकालवशेनान्तरम्पततिः १ उक्तञ्चसूर्य्यसिद्धान्ते शास्त्रमाद्यन्तदेवेदं यत्पूर्वं
१॰ प्राहभास्करः युगानाम्परिवर्तेनकालभेदोत्रकेवलमिति वशिष्ठसिद्धान्तेपि इत्यस्माराडव्यसंक्षेपादुक्तं शास्त्रमयोदितम् विस्त
११ स्तीरविन्द्र्युद्धेभविष्यतियुगेयुगे विस्तरसनम्विस्तरस्तिः शिथिलत्वमितियावत सिद्धान्तसुत्रेपि मुनिप्रणीतेमनुजैः कश्चित्तु
दृश्यतेनरम् तदातदेवसंसाध्यंनकार्यंसर्वमन्यथेति नत्त्तरंबीजसंज्ञब्रह्मगुप्तमकरंदमिश्रादिभिः स्वसत्तादिकालेलक्ष्य
पित्वाक्षुनिशास्त्रजनितेषुग्रहेषुसंस्कृतंतदुक्तमेव तथाच ब्रह्मसिद्धान्ते संसाध्यस्पष्टतरंबीजंनलिकादियंत्रेभ्यःभत्संस्कृ
तग्रहेभ्यः कर्तव्योनिर्णयादेशाविन्यस्त अथपञ्चाङ्गयंत्रादेवनात्कालिकीकरणेनस्पष्टग्रहानयनमुक्तं श्रीमन्त्रीत्नक।
राठेदैवज्ञैः गतैष्य दिवसाद्येनगतिर्निघ्नीखषट् ६० हृता लब्धमंशादिकं सोध्यंयोज्यंस्पष्टोभवेद्ग्रहइति अथग्रन्थे।
गीयनक्षत्रादेवचंद्रस्पष्टीकरणमुक्तं तैरेव इतस्तेनाड्यः खरसेषु ६० शुद्धाः सूर्य्योदयादिष्टघटीषुयुक्ताः भयातसंज्ञा
तंशांशीभागपूर्वस्तुभुक्तिः खखाभ्राष्टवेदा ४८००० भभोगेनभक्ताइति अत्रेदंध्येयम् पंचांगीयग्रहाः किंदेशीयाश्च
भवतीहचैवंनिजर्क्ष नाड्यः सहितोभभोगः खषट्घ्नम्भयातंभभोगोहृतंतत्त्वतर्के ६० घ्नधिस्तेषुयुक्तंहिनि २ घ्नम् तेवा
स्यन्तःस्थमनुष्यः किंदेशीयः नहिसर्वदेशीयमनुष्याणामेकदेशनिष्पन्नपञ्चाङ्गेनस्पष्टाग्रहाः कर्तुंयुज्यन्तेदेशभेदेनदे

दे

शंगमरभुजांतरोदयांतरचरपलादिसंस्कारसद्भावात्सूर्यादिसर्वेग्रहाणामन्यथादर्शनात् तस्मात्स्पष्टग्रहसहितैस्तद्देशी।

यपर्ण्वांगैः कृत्वातद्देशीयमनुष्याणांस्पष्टाग्रहाः कर्त्तुमिष्यन्तेनतत्वन्यत्रेतिज्ञेयम् अथलग्नादिद्वादशभावसाधनमु

क्तंचजातकसुधानिधौ जन्मांहृष्टछादिसुभाशुभेषुभावाविधेयासुधियायतोत्र तत्तद्दशेनैवदिशंतिनित्यंसुभाशुभं

भावभवंनभोगाइतिताजिकतिलकेपि भावसाधनमथाभिधीयतेहायनोत्यफलनिर्णयहेतोः प्रस्मयानजनिवर्षे

वेशनेभावसाधनमथादिकारणमिति भावानांनामान्युक्तानिताजिकमुक्तावल्यां तनुर्धनंभ्रातृसुहृत्सुतारिस्त्री

रंध्रधर्माः क्रमशोविलग्नात् व्यापारलाभव्ययसंज्ञकाश्चसंहारगत्यास्पुरिमेर्कतुल्याइति अत्रलग्नादिभावान्नत्वा

र्थसंज्ञाज्ञेयाः पथादेहविचारोलग्नात् द्रव्यविचारोद्वितीयादेवंसर्वत्र एतत्सविशेषभावविचारेवक्ष्यामः तत्रभावान

मनोपायमुक्तं चरखंडदिनार्द्धानयनं स्यात्सायनेर्केजतुलादियातेशंक १२ प्रभास्तद्युदलेस्वभासात्रिधाश्रुभादिग्गज

दिग्विशोन्त्वत्यान्त्रिहृत्स्युश्चरखंडकानि स्यात्सायनोस्तासुभुजर्क्षसंस्थ्य चराद्वियोगात्लवभोग्यघातात् खाग्न्याप्तियुक्

स्वचरपलादिषष्ठ्याविभक्तं घटिकादिकंस्यात् चरेणसंयुतोनाश्चकर्तव्यातिथिनाडिकाः मेषजूकादिषड्भेस्व

पनेस्तेदिवादले दिनार्द्धंत्रिंशतः शुद्धंशेषंरात्रिदलंभवेत् अयनत्ताद्दीनामानयनमुक्तंसकलसिद्धांतमंडलीसारे।

ह्रा॰ विहृत्यणराजहंसगणितविद्याचातुरीतांत्रिकपंचाननाद्दिगवीश्ववीरेण: पद्धतिचिंतामणौ नताद्दौननतोन्नतानयनं दिना
१॰ र्द्धसंगुणत्रिगतावशेषनाज्योन्नतंपश्चिमपूर्वकंस्यात् द्युयातहीनंद्युदलेननतंप्राक्द्युखंडहीनेद्युगतंपरंतत् अथाभ
११ यनांशान्नयनं भूनेत्रवेदो ४२१ नशाकोदशांशहीनः खषड्भि विहृतोयनांशाः त्रिघ्नोर्कराशिः स्वदलेनयुक्तस्तावन्निम्न
ताभिर्विकलाभिराढ्याः अथस्पष्टलग्नानयने तत्रस्पष्टलग्नानयनोपयुक्तंस्वोदयसाधनंब्रह्मतुल्ये लंकोदयानोग
तुरंगदस्रागोक्ताश्विनेत्रामरदाविनाड्यः क्रमोत्क्रमस्था २७८।२९९।३२३।३२३।२९९।२ ८ खररवराङ्केस्वैः
क्रमात्क्रमस्थैश्चविहीनयुक्ताः मेषादिषस्युमुदयास्स्वदेशेतुलादितोमीचविलोमसंस्थाः १ अथलग्नसाधनं सू य
त्कालार्कस्सायनस्तस्यभोग्यैभोगैर्निघ्नः स्वोदयः खाग्निभक्तः भोग्यन्तुत्याद्दिष्टनाडीपलेभ्यः शेषाद्गत्याक्षोदयाश्च
शुद्धाश्वशेषम् त्रिंशन्निघ्नमशुद्धाप्तभागाद्यमेषपूर्वकैः अशुद्धान्त्यागटहे युक्तंलग्नंस्यात्सायनांशकम् १ भोग्यास्य
कालान्तवत्रिघ्नात्स्वोदयाप्तलवादियुक् रविरेवभवेल्लग्नंसषड्भार्कोत्रिशान्तनुः अत्रजन्मदेशीयमेषादिलग्नमानै
र्लग्नस्यस्पष्टीकरणंकर्तव्यंनत्वन्यदेशोदयैरिति अथधनर्णलग्नानयनेविशेषः सूर्योदयाद्यातघटीषुभोग्येर्दिवा
वशेषैस्सभार्कभुक्तैः निशागतेव्यङ्गयुतार्कभोग्यैर्निशावशेषैरविभुक्तभागैः गतागतैराश्युदयैः खभोक्त्यालग्नं ध

नरांसममेवंभूयादिति अथदशमलग्नानयनम् युक्तायनांशार्कगतैष्यभागाः लंकोदयघ्नाः खगुणोद्धृतास्तत्
स्वाद्भुक्तभोग्यंत्यजनस्यजत्यात्पलीकृतात् मागपरान्तरात्तत् क्रमाद्गतैष्यानुदयांश्चशेषमशुद्धहृत्वाग्निगुणं
लवाद्यम् विशुद्धपूर्वापरमेविहीनयुतंखभंस्यादयनांशहीनम् लग्नंसषड्भम्मदनाभिधानंतुर्याभिधं
स्याद्दशमात्सषड्भात् अथपूर्वेननैपिधनलग्नानयनार्थंमदीयम्वृत्तम् प्राङ्नतस्योन्नतंहत्वारविंकृत्वासि
षड्भकम् लंकोदयैधनाख्यनकर्मणास्यान्नवमंस्फुटम् अथनतंविनैवलग्नादेवदशमलग्नसाधनंत
विवोद्धृत्यावने कृत्वालग्नादर्कवद्यात्रिखराडभूयोव्यसेस्तद्घटीभिर्विलग्नम् चक्रार्द्धाद् नतेचनतन्कालमे
वंजायपातोभस्तमथ्याहूनलग्नेइति अयमर्थः प्रथमंस्वाभीष्टकालेस्वदेशीयोदयैर्लग्नंकार्यंततस्तदेवलग्नंद
शमत्वायनांशैःसूर्यैकृत्स्वयित्वायनांशाह्यभानोरितिचरदलमानेयम् ततश्चरपलयुतहीनानाडिकाःप्रंचचंद्रा
द्युदलंअथनिशार्द्धेयाम्ययोर्नैविलोममितिरात्रिदलमानेयंततोरात्रिदलमेवेष्टकालम्प्रकल्प्यप्रागानीतंल
ग्नमर्कंकल्प्ययित्वा व्यसेर्लंकोदयैरुक्तप्रकारेणानीतंलग्नंचतुर्थलग्नंभवति अथनेप्रागलग्नचतुर्थेषड्भंपूने
क्रमेणसप्तमदशमलग्नेभवेतां अथलग्नचतुर्थयोः सिद्धौससंधिसर्वभावानयनेमनत्कृतपद्यानि लग्नंचतु

हा॰ योऽन्त्यशेषो द्व्यंशेषषड्भिर्द्विर्दिभाजितम् राश्यादि योजयेल्लग्ने संधिस्स्याल्लग्नवित्तयोः सन्धिः षडंशसंयुक्तो ध
१॰ नभावो भवेत्स्फुटः धनभावः षडंशाढ्यस्सन्धिर्द्वितृतीययोः षडंशस्संयुतस्सन्धिस्तृतीयो भाव उच्यते षडं
१४ शाढ्यस्तृतीयस्यात्सन्धिर्भ्रातृचतुर्थयोः तृतीयसन्धिरेकाढ्यस्सुखसंधिर्भवेदिह द्व्याढ्यस्तृतीयभावोऽपि पुत्र
भावो भवेत्स्फुटः त्र्याढ्यो द्वितीयसंधिः स्यात्संधिः पञ्चमभावजः धनभावो वेदयुतो रिपुभावः प्रजायते लग्न
संधिः पञ्चयुतः सन्धिस्स्याद्रिपुभावजः लग्नाद्याः संधिसहिता भावाः षड्राशिसंयुताः सप्तमाद्या भवन्तीह भावाः
सर्वे ससंधय इति अथ केवललग्नज्ञानादेव सकलभावराशिसाधनार्थं सुगमोपायो मया कृतः स्पष्टलग्नाद्[illegible]
मारणविधिना चरमानयेत् लग्ने मेषादिषड्भस्थे तेनोनास्तिथिनाडिकाः तुलादिषड्भे सहिताः प्रकल्प्यास्तैरंके
पुनः तैरंशैस्सहितं लग्नं लग्नसन्धिः प्रजायते तैर्युतो लग्नसंधिश्च धनभावो भवेदिह तैर्युक्तो धनभावश्च धन
सन्धिः प्रजायते तैर्युक्तो धनसन्धिश्च भ्रातृभावो भवेत्स्फुटम् तैस्संयुतो भ्रातृभावस्सन्धिस्स्यात्सहजाम्बि
धः तृतीयसन्धिस्तैर्युक्तस्सुखभावः प्रजायते पूर्वोक्तवत्प्रसंसाध्याः शेषाः भावास्ससन्धय इति भावविचा
रं फलमुक्तं श्रीमन्नीलकण्ठदेवज्ञैः खेटे सन्धिद्वयानास्ये फलं तद्भावजं भवेत् हीनेऽधिके द्विसन्धिभ्यामभा

विपूर्वापरेफलम् अन्यत्रापि आरम्भसन्धेर्द्युचरोपदेनः फलह्रदात्यादिमभावजातम् विरामसन्धेरधिकस्तदानीमागा
मिभावोत्थफलप्रदस्स्या दिति अत्रेदमवगन्तव्यम् यदाकदाविदेकराशिर्भावद्वयेसमायाति अथवासकराशिंपरित्यज्याव
याति तथाभावकुण्डल्यान्ताहृंशस्व राशयस्थाप्याः सन्धिराशादितुल्योग्रहः पूर्वापरभावसन्धिस्थयोरेखायामेवस्थाप्यः
अथचभावकुण्डलीकेवलंभावफलार्थमेवअन्यस्सर्वोपिताजिकविचारोग्रहकुण्डल्येवविधेयइतिनिश्चयः अ[illegible]
भावविंशोपकानयनमुक्तम्मुक्तावल्याम् ग्रहसन्ध्यन्तरंभावसन्ध्यन्तरविभाजितम् लब्धंभावफलंज्ञेयंनति[illegible]
विशोपकाः १ अत्रान्तरकरणेविशेषउक्तः पद्धतौ आद्यसन्धिगेहाद्रांवाञ्छोध्योभावोनकेग्रहे भावस्यसन्धिम[illegible]
ध्योग्रहोभावस्तथाधिके भावतस्तुफलंसर्वेजन्मवर्षव्रतादिषु विंशोपकात्तमनिनगमनम्प्रस्तवास्तुषु अथकौ[illegible]
शोंभावेग्रहसंयोगेनशुभाशुभंवाफलंप्रयच्छतीत्युक्तंताजिकतिलके निजपतिगुरुवित्सुरारिपूज्यैर्यदिसहितस्त्व।
विलोकितः सभावः अतिशयफलदोनशेषखेटैरयसहितस्त्ववलोकितोवशेषैः अत्रवक्ष्यमाणभाववलेसबल।
भावस्यफलंदातृत्वंनिर्वलस्यनैवेतिज्ञेयं अथास्माद्गृहादयंग्रहः कस्मिंस्थानेस्तीतिज्ञानार्थंपवनमनेनेतरेतरसंख्या
उक्ताचिंतामणौ अर्कादिभ्यश्चद्युपूर्वोन्सलग्नास्स्वत्काशेषाधोलवाः पञ्चभूभ्यः चेन्न्यूनास्तच्छोधिताश्शुद्धिमान्स्या।

हा॰ तस्मिन्राशावन्यथाभेपरस्मिन्निति इतिदैवज्ञवर्यपण्डितदामोदरात्मजवलभद्रविरचितेहायनरत्नेग्रहराशिस्वरूपव
१॰ र्षप्रवेशाद्यानयनाधिकारः प्रथमः १ अथग्रहाणांदृगाध्यायोनिरूप्यते तत्रदृष्टिप्रयोजनमुक्तंताजिकालंकारे भमा
१५ श्वराणांअप्रोक्तंयावद्दीप्तांशाःस्वदृष्ट्या तावन्नशक्यतेवक्तुंफलंवर्षेशुभाशुभमिति योगसुधानिधावपि प्राप्तेकोणाप्य
खिलेवर्षेजातेपूर्णेगतेभ्राम्यतिदृष्टिहीनः तयोपदिष्टेष्टफलेविनेशःस्वराणांवदामिदृष्ट्यानयनंततोहमिति तत्रग्रहाणांचा
तुर्द्धादृष्टिः एकाप्रत्यक्षस्नेहासमस्तलोकसमक्षस्नेहदा द्वितीयागुप्तस्नेहाअप्रत्यक्षस्नेहकारिकाअकथितमेवेष्ट[illegible]
येसंसिद्धिदा तृतीयागुप्तवैराअप्रकाशितशत्रुभावकारिका चतुर्थाप्रत्यक्षवैरा आसांलक्षणं दृष्टिपरिमाणंच[illegible]
मरसिंहः नवपंचमयो ९।५ दृष्टिःपादोना ४५ सर्वदृष्टितःसवला मेलापकदृष्टिरियंप्रत्यक्षस्नेहदृष्टिश्च[illegible]
कादशयो ३।११ दृष्टेयोवीक्षतेन्तृतीयदृशा तद्दृष्टिस्त्र्यंशोना ४० न्यस्यतुषड्भाग १ दृष्टिश्च अनयोर्गुप्त[illegible]भावश्च[illegible]
सर्वत्रकार्यसिद्धिकरी अनयैकादशस्थानद्रष्टुः दशमचतुर्थे १०।४ दृष्टिःपाद १५ दृगिहगुप्तदुर्जनाह[illegible]हजामि
त्रोश्यसप्तमकेसकला ६० प्रत्यक्षदुर्जनादृष्टिः एकर्क्षस्थितयोरप्युभयोर्दृष्टिर्मतासकला ६० दृष्टिश्चर[illegible]भावविचा
सप्तखाम्बुनितिस्रोरिदृशःसुतारव्यास्त्र्युरितिविरादंदृष्टिफलमाह वामनःपञ्चमेनवमेदृष्टिस्सर्वसौख्य[illegible]येम्यामा

दा. प्रकटीकुरुते त्वेषामित्राणि स्वजनांस्तथा तृतीयेकादशे दृष्टिस्सदा स्नेहप्रवर्द्धिनी सुतसन्तोषदा भव्या रे नीमागा
धनेश्वरा चतुर्थे दशमे दृष्टिर्गुप्तदुर्जनभेदिका मित्रघातकरी दुष्टा शोकसन्तापवर्द्धिनी उभयोस्सप्तमा दृष्टि त्यज्याव
पुभेदिनी विवादं विग्रहं युद्धं संकटं च करोतिहि एकर्क्षे वलिनी दृष्टिः प्रधान्यात्कार्यसाधिनी स्वस्थाने फलद स्याप्य:
त्रपश्चात्थेवच तृतीयेकादशे पाद १५ दलं व्योमचतुर्थयोः ३० त्रिकोणे त्र्यंह्रि ४५ मूर्त्यस्थे पूर्णं पश्यन्ति चः अत्र
ति अत्र वामनेन तृतीये अंशेना ४० एकादशमे षड्भि १० गमिता चतुर्थ दशमे पादमिता १५ दृष्टिरुक्ता तेन
तस्य समरसिंहस्य विरुद्धा ह्यनेकताजिकग्रन्थादौ मूलमृग्यमिति ताजिकसारेपि पाद त्रित्रुदस्व दलं ख चतुर्थे
त्र्यंस्यान्नव पञ्चमेपि पश्यन्ति पूर्णं सममसप्तके च ग्रहान्यचान्यत्र विलोकयन्तीति अत्रैकर्क्षे समरसिंहेनाशुभा दृ
ष्टिरुक्ता वामनेन शुभा दृष्टिरुक्ता अनयोर्वाक्ययोर्व्यवस्था यो ग्रहावेकस्थानगतौ उच्चस्वगृहगतौ
वा स्वांशगौ मैत्रीचक्रेण प्रकारान्तरेण वा मित्रगृहगौ १० वास्थानाम् तदा तयोर्दृष्टिश्शुभफलदात्री· यदा तु स ।
मशत्रुनीचक्षेत्रादिगौ स्यातां तदा नयोर्दृष्टिरशुभेति अथ यवननामाङ्किता दृष्टिः प्रकाशिता स्यादेकर्क्षे सप्तमे
स्यान्मुकाविला तरवीदिक चतुर्थे तु निस्वः प्रोक्ता भयप्रदा स्तृतीयैकादशे दृष्टिस्त दा प्रोक्ता महोत्तमा नवपञ्च

योर्दृष्टिर्द्वे लीनोक्तामहाशुभेति अथदृष्टृदृश्ययोराशिभेदेसत्यपिद्वादशांशमध्ये तयोरवस्थानेदृष्ट्योर्ये शीतं
फलदात्र्यःस्युःद्वादशांशातिक्रमेतुसाधारणफलदात्र्यःस्युरित्युक्तंसमरसिंहेन सर्वांश्चैताह्विदृशो १२ द्वादृशे
भागांतरेभवेयुश्चेत् तत्सर्वविशेषाज्ञेयादृष्ट्यानुसारात्सर्वमिति वामनोपि दृष्टिस्थानेषुसर्वेषुद्वादशांशांतरे
स्थितः शीघ्रग्रहाद्गुहोमन्दःशुभासादृष्टिरुच्यतइति अत्रग्रहाणांदीप्तांशमध्येदृष्टिफलंपूर्णमित्युक्तंताजि
कतन्त्रमालायां दीप्तभांगस्थिताः संतोदृष्टिस्थानेषुचेत्स्थिताः तदादृष्टिफलंपूर्णंप्रोक्तंयंच्छंतिखेचराः इ
ति संज्ञासंत्रे पुरःस्थेस्वदीप्तांशैर्विशिष्टंदृक्फलंग्रहः दद्यादतिक्रमेतेषांमध्यमंदृक्फलंविदुरिति वि
मुक्तावल्यां शीघ्रखेचरपुरःस्थिरगामीतस्यदृक्निगदिताविफलासा अन्यथाभवतिभाविफलानैवंते
नफलदासमग्रात्येति अन्योविशेषास्ताजिकसारे क्रूरग्रहाश्चेत्वलदृष्टिसंस्थापापेतराः सौम्यदृशिस्थिताः
यच्छंतितेदृष्टिफलंपयोक्तंफलंतदर्द्धंच विलोमसंस्थाइति यदातुक्रूराःसौम्यदृष्टिविषयेसौम्याः क्रूरदृष्टिवि
षयेतदार्द्धफलदातारःस्युःक्रूरसौम्ययोर्योगेचरणत्रयंफलंज्ञेयं यदाहवामनः दुष्टदृष्टिस्थिताःक्रूराःसौम्याः।
सौम्यदृगाश्रिताः दृष्टुद्रवंफलंपूर्णंनृणांयच्छंतिखेचराःव्यत्ययस्थाःफलस्यार्द्धंयच्छंतिग्रहदृष्टिजं पादो

नसौम्यपापैश्चफलंज्ञेयंविचक्षणैरिति विशेषान्तरमाह समरसिंहः चक्रस्यवामदृष्टेर्दक्षिणादृष्टिर्बलीयसी ज्ञे।
ति अत्रचक्रस्यवामदक्षिणात्लक्षणमुक्तंहिल्लाजेन घुनाद्वराशिषट्कंबाह्याख्यंचान्तरंलग्नात् बाह्याभ्यन्तर
योरपि[illegible]क्तावामदक्षिणाख्यातुवामनोपि चक्रार्धनार्द्धलेदृष्टिर्ग्रहाणाम्वामदक्षिणा ज्ञेयाताभ्यामन्वलेपि
णावामदृष्टिस्तुदक्षिणेति अयमर्थः लग्नस्यग्रहस्यभोग्यभागादारभ्यसप्तमभुक्तभागपर्यन्तंयावद्दृष्टिः सा
क्षिणा एवंसप्तमाद्बलग्नेयावद्वामदृष्टिस्स्याद्दक्षिणादृष्ट्याऽपेक्षयासबलाज्ञेयेतिउदाहरणमाह समर
भूकेन्द्रोपरिदृष्टिर्मध्यात्सबलेतिसर्वत्रेति अस्यार्थः दशमदृष्टेस्सकाशाद्भूकेन्द्रोपरियादृष्टिस्सासन्ने
वंसर्वत्रज्ञेयम् यथासप्तमस्थग्रहस्यलग्नाद्दशमेचतुर्थेचपार्श्वमितादृष्टिरस्ति तुचतुर्थदृष्टिर्वामदृष्टिर्वा
शमंदक्षिणादृष्ट्यपेक्षयाऽन्त्यशालादियोगेष्वन्ययोगेष्वपिवासबलाज्ञेयेति अथस्थानविशेषोक्तदृष्टेर्वि
शेषफलनिर्णयार्थस्फुटदृष्टिकलानयनमुक्तंसंज्ञातन्त्रे ॥
॥ ॥ अपास्यपश्यन्निजदृश्यखे
टाद्देकादिशेषध्रुवलिप्तिकास्स्युः पूर्णाख्ववेदास्तियथोस्सवेदाखेषष्टिरभ्रंशरवेदसंख्यातिथ्यः खेचन्द्रौविश्वे

हो० अन्तर्कोशशेषांशयोस्तेष्यविशेषघातात् लब्धं खरामैरधिकोनके ष्ये स्वर्णमृणं भवेताः स्फुटदृष्टिलिप्ता इति अथात्र सूक्ष्मे
र० पायोमतस्कृतः दृष्ट्याविहीनदृश्यस्यशेषतोदृष्टिरुच्यते एकशेषेविनाराशिमंशाद्यं दृष्टिरुच्यते द्विभेपञ्चदशोभेदृश्या
१७ गार्द्धञ्चत्रिशेषके भागार्द्धं त्रिंशता ३० युक्तञ्चतुर्थे स्वार्द्धसंयुतम् भोग्यांशापञ्चमेद्विघ्नाभोक्तांशादृष्टिरुच्यते षष्ठे।
द्विघ्नाभोग्यभागाः सप्तमेस्वार्द्धसंयुताः भुक्तभागाभवेन्दृष्टिः कलाद्यातानिकोदिना अष्टमाभ्यधिकंभ्योस्य राश्याद्यं
भवराशितः शेषमंशीकृतं द्वाभ्यां हृतं दृष्टिस्तुजायते नवमेदशमेप्येवंशिवभेभुक्त भागका द्विनिघ्नाशून्यभेद्वि।
घ्नाभोग्यांशादृष्टिरुच्यते अथास्मिन्दृष्टिगणितेस्थानदृष्टिंविनापिग्रहाणांदृष्टिराप्यातितद्यथा दृश्योभौमः ५।१५
द्रष्टाचन्द्रः ०।१५ अत्रोभयोर्यद्यपिषष्टाष्टमस्थानदृष्टिर्नास्तितथापिपूर्वोक्तगणितेनागतादृष्टिकलाः २० तत्रैतस्या
मारोत्थशालादियोगेवर्षेशविचारेच अथचयोभावस्वामिसोम्याभ्यान्दृष्टोयुक्तोंयमेधनइत्यादिभावविचारेच
स्थानदृष्टिं [illegible] मारायद्दृ गणितागतदृष्टेर्वाइतिसंशयनिवारणार्थंयथोभयोरैक्यम्भवतितथादृष्टिगणितमुक्तमु
क्तत्याम् दृष्टनदृश्येपदशादृग्भतुल्ये १०।२ भागाद्यधोनेत्र २ हतन्त्रिथि [illegible] भ्यः [illegible] खरामे ३० भ्य इभा
१ ध्धिमेतु ८।४ त्रिघ्नेन्द्वि २ हृत्याप्तमिषुश्रुतिभ्यः ४५ खतर्के ६० राशिप्रमितेऽ [illegible] शोनिघ्नन्त्वियदूसैभ्यो ६० भवतीहदृष्टिः स्यु।

तिन्हु ४।१ निघ्नत्रिलवोह्वि दिग्भे २।१० खाब्धी ४० रके १० भ्यः स्मरसिंहशास्त्रादिति अत्र तृतीयैकादशाद्युक्तदृष्टिस्थानेषु

दृष्ट.	०	१	२	३	४	५	६	७	८	९	१०	११
हीं क.	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	०	६०	७०	४५	१५	०	०
अंतर	६०	४०	२५	२०	४५	६०	६०	४५	३०	१५	[illegible]	६०
रि	ऋ	ध	ऋ	ध	ऋ	ध	ऋ	ध	ऋ	ध	ऋ	ध

१	२	३	४	५	६	७	८	९	१०	११	१२
अंशाद्वेष्म०	भुक्तमशाद्भम	३०अंशाद्युताम	भोग्यांशात्वा अंता:	भुक्तांशाद्विगुण	भोग्यांशाद्विगुण	भुक्तांशास्त्वाईगेता	राश्या द्युराराशिशुद्ध भुक्ताकवदि[illegible]	अरमवत०००	अष्टमवत्०००	भुक्तांशाद्विगुण	भोग्यांशाद्विगुण

दृष्टावर्जितदृशा:	१०	२	३	९	४	८	०	६	२	
शेषभाग गतद्युकला	१	१	१	१	२	३	२	२	४	१
भाङ्कक्रौ:	२	२	१	१	२	२	१	१	३	३
पा का कला:	१५	१५	३०	३०	४५	[illegible]	[illegible]	२०	४०	

वद्दृष्टिगणितमुक्तंन्नान्यस्थानेषु तत्रापि राश्यादावुक्तदृष्टेः प्रारंभः राश्यंते च क्षयः सर्वस्थानदृष्टिगणितानांगतदृष्टौरे
क्यानुर्क्क ज्योतिर्विदोक्तमेवदृष्टिगणितयुक्तिसहितमालोचयामः अथदृक्खेचरानमुक्तं ताजिकालंकारे खेटाधिष्ठि[illegible]
भोदयावधिधिष्ण्यानक्रादिलंकोदयान् संयोज्याप्तमितः फलं खशशि १० भिः सांशादिदृक्खेचरः युक्तो भेनषु

हा॰ लयेष्टखचरं मेषात्त्वदेशोदयानेकीकृत्य पुनस्तथैवखचरः साध्योंशपूर्वैर्गुणैः स्वाद्यागद्दलनयोस्सैभवति स्पष्टो थ[illegible]मह
९ स्युंस्तद्भागमितालवायदिनदोदृष्टिः स्फुटासोच्यते ज्ञेयं दृग्जनितं शुभाशुभफलं पूर्णं ततो धीमता केषांचिन्मते[illegible]
१८ शिमयाखेचारिणाभाषितं यादवः स्वंतयोर्भागकाश्चदीप्तांशतुल्यायदियोगकार्ये योगोन्यमिष्टयद्विवाच्यनिष्टंनिहान्त्र
दत्ते किलवश्यमंशानामिति अथदृष्टिगणितेविशेषांतरोमिश्रोक्तः दृश्यस्यदृष्टारहितस्यभागागजेंदुभिः १८ श्चेदधिकारव
णमा ३० तच्छोध्या पुनस्तेरविनो १२ विशोध्याः स्वदीप्तभागादथवाविशोध्यान वेदिग्सहं तिन्[illegible]कस्याद्ययोक्तदृक्ताने
नकस्त्वाविनिघ्नाः दिवाकरे १२ दीप्तलवैः क्रमेणभक्ताः स्फुटादृष्टिकलाभवंतीति ग्रहदृष्टिप्रयोजनमाहवामनः फ
लंदृष्टिप्रमाणेनस्वयंपच्छंतिखेचराः तत्फलंबलमानेन ज्ञात्वादेश्यंशुभाशुभमिति अथदृष्टिप्रधानत्वान्मैत्रीचक्रा
स्यपूर्वं[illegible]भिहितास्तत्रावसरप्राप्तं मैत्रीचक्रमुच्यते तत्रमैत्रीचक्रंचतुर्विधं एकंदृष्टिवशेनमित्रसम शत्रुरूपं द्वि
द्वितीयं[illegible]वशेनाधिमित्रसमशत्रुअधिशत्रुरूपं तृतीयदृष्टिवशेनमित्रशत्रुरूपम् चतुर्थं दृष्टिंविनैवनियतमित्रशत्रु
रूपम् तत्रप्रथमं त्रिधामैत्र्यादिसहितंमैत्रीचक्रमुक्तं रोमकताजिके मित्रंतृतीयपंचमनवमैकादश ३।५।९।११ग
तोपियोजस्य धनरिपुमृतिरिष्फेषुच २।६।८।१२ समोग्रहस्स्यात्त्रिनिर्देश्यम् शत्रुस्तथैकतुर्यजायास्थानेनयां

शादशमे १।४।७।१० ताजिकद्विजराजमतेनैनादृक्कथितैरस्माभिरिति द्वितीयं विशेषबलोपयुक्तमब्दपधामे ।। म
त्रीचक्रमुक्तम्मुक्तावल्यामृषभत्यस्सममत्वदृष्टि ९।५ फलदो ज्ञेयो ऽधिमित्राभिधो गुणस्नेहदृशा ३।११ यथा
रयति [illegible] यमित्रमस्यस्मृते नैवालोकयतीह २।६।८ यस्तनुसमो योगुणदोजेन्यदृक् ४।१० दृष्ट्याशत्रुरयाधि
शत्रुरपि यः प्रत्यक्षदोजेन्यदृक् ७।१ इति तृतीयम्मित्रशत्रुरूपम्मैत्रीचक्रमुक्तन्तत्रैव इष्टानिष्टे स्वकोष्ठे दोनेक
कौचक्षुभाशुभम् यद्वामित्रारिपूजेयोस्वदृङ्ज्ञानानुमानन इति चतुर्थं निपतमित्रशत्रुरूपन्द्विविधम्मैत्रीचक्रमुक्तन्ता

मित्रामित्रसूर्यादीनाम्							
ग्रह	सू	चं	मं	बु	बृ	शु	श
मि.	चं मं बृ	सू मं बृ	सू चं बृ	श शु	चं सू म	बु श	बु शु
शत्रु	शु श	बु शु श	बु शु श	सू चं मं	बु शु श	सू चं मं	सू चं मं

जिकसारे मित्राण्यार्शशाङ्क शक्रसचिवा भौमार्कदेवार्चिता जीवार्कस्य गणाद्बोधि
पाश्शनिसितौ चन्द्रार्कभूनन्दनाः सौम्यादित्यभवौ शशाङ्कजसितौ मन्दज्ञशुक्राङ्गा
मेसूर्यात्स्पूरिपवस्सुताजिकमते ज्ञेया बुधैश्चादिता इति एवं सर्वेषाञ्चक्राणां
पश्यासम्प्रदायप्रवस्यादृष्टव्येति मैत्रीचक्रप्रयोजनमस्यमाणपञ्चवर्गीवलो
ज्ञेयम् तदग्ने सर्वम्प्रकटीभविष्यति अथ पञ्चवर्गीवलनन्त्रयोजनं [illegible]
वसूरिः वलम्विंशोपकज्ञानम्पञ्चवर्गीवलम्विना न भवेदथवस्यामिप वि

गौच्चसाधनमिति ताजिकालंकारेपि वीर्य्यज्ञानेवर्षनाथप्रसिद्धः कर्त्तुंशक्यानेवयस्मात्समासु ज्ञातुंवीर्य्येसूर्यादि
खेचरराणांतस्माद्वक्ष्येपञ्चवर्गीविधानमिति पञ्चवर्गीनाहसमरसिंहः स्वगृहंस्वोच्चंहद्दत्रैराशिकमथमुसल्लहं चेति
ति पञ्चग्रहाधिकारोविनाधिकारंग्रहोनवलीति तदर्थंग्रहेशानाहवामनः भौमशुक्रज्ञचंद्रार्कबुधशुक्राः कुमंत्रिणः
शौरिः शनिस्तथाजीवोमेषादीनामधीश्वराइति अथग्रहाणामुच्चनीचराशीन्तत्परमोच्चा
नाहयादवः मेषोवृषोथमकरोमृगदृक्कुलीरोमीनस्तुलादिनपपूर्वविगोच्चकानि अंशा१०
ग्नि३ पिंड२८ तिथि१५वाण५भ२७विंश२०तुल्यास्तुगोलवाः स्वनगभास्तुभवंतिनीचाइति।
राशिषुहद्देशाः संज्ञातत्रे मेषेगतकोष्टशरेषुभागाजीवास्फुजिद्वारशनैश्चराणां २ वृषेष्टषसा
गरसायकाङ्काः शुक्रज्ञजीवार्किकुजेशहद्दाः युग्मेषडंगेषुनगांगभागाः सौम्यास्फुजिज्जीवकुजार्किहद्दाः क
र्केद्रितर्का…गाब्धिभागाः कुजास्फुजिद्भृज्यशनैश्चराणां सिंहेगभूताद्रिरसांगभागादेवेज्यशुक्रार्किबुधारहद्दाः
द्दाः स्त्रियांनगाशाब्धिनागागास्तभागाः सौम्योशनोजीवकुजार्किनाथाः तुलेरसाष्टाद्रिनगद्विभागाः कोणज्ञजी
वास्फुजिदारहद्दाः कीटेनगाब्ध्यष्टशरांगभागाभौमास्फुजिद्भृज्यशनैश्चराणाम् चापेरवीन्द्रस्वधिपञ्चवेदाजी।

सू	चं	मं	बु	गु	शु	श
०	१	९	५	३	११	६
१०	३	२४	१५	५	२७	२०
६	७	३	११	९	५	०
१०	३	२४	१५	५	२७	२०

वास्फजिद्वारशनैश्चराणाम् मृगे नगा घस्रयुगश्रुतीनां सौम्येज्यशुक्रार्किकुजेशहद्दा कुम्भे नगांगाद्रिशरे
वाणा: ज्ञशुजीवारशनैश्चराणाम् मीनेर्कवेदानलनंदपक्षा: सितेज्यसौम्यारशनैश्चराणाम् अथ त्रैरा
शिके शा[illegible]का स्ताजिकालंकारे मेषे भौमार्कशुक्रा बुधविधुशनय:
सुरेषु युग्मराशौ देवेज्यक्ष्माजसूर्या: सितबुधशशिन: कर्कटे संप्रदिष्टा: सिं
हे मंदेज्यभौमा रविसितशशिजा: स्युर्युवत्यां तुलायां स्वज्ञार्कीज्यास्स्वया
लौ कुजज्ञरविकवयो ज्ञेन्दुमन्दाश्च चापे मकरे गुरुभौमपशि नीशास्सितविच्च
न्द्रमसो घटेसितज्ञका: शनिवाक्यतिभूमिजास्तु मीने कथिमास्सद्रुण वैदे।
काणनाथा इति त्रैराशिकेश्वरा लाघवेनोक्तास्सज्ञातन्त्रे आद्या: कुजाद्या
रविर्नौपिमध्यमास्सितात्तृतीया: क्रियतो द्रेष्काणपा इति अनिलाव
वेन त्रैराशिकेश्वरा उक्ताहरिभद्रदैवज्ञै: द्विशून्यपञ्चयुग्मा शिस्सप्तनष्ठे
द्रेष्काणपा: अत्र वर्तमानो राशिर्ज्ञेय: वर्तमानराशि: प्रथमद्रेष्काणो

मे	वृ	मि	क	सिं	कं	तु	वृ	ध	म	कु	मी
बु ६	शु	बु	गु	वृ ६	बु ७	श ६	म	वृ	बु ७	बु ७	शु
शु ६	बु ६	शु ६	शु ६	शु ५	शु ११	बु ८	शु ४	शु ५	र ३	[illegible] ६	र ४
बु ७	र ८	बु ५	बु ६	श ७	बु ४	र ७	[illegible] ८	बु ४	शु ८	[illegible] ७	शु ३
म ५	श ५	म ७	र ७	बु म	म ७	बु	र ५	म ५	श ४	म ५	म ६
श ५	म ३	श ६	श ४	म ६	श २	म ३	श ६	श ४	म ४	श ५	श ३

१	२	३	४	५	६	७	८	९	१०	११	१२	ए
मं	बु	र	शु	श	सू	चं	मं	बु	र	शु	श	[illegible]
सू	चं	मं	बु	र	शु	श	सू	चं	मं	बु	[illegible]	वि
शु	श	सू	चं	मं	बु	र	शु	श	सू	चं	[illegible]	[illegible]

हा० द्वियुतो द्वितीयद्रेष्काणोऽभूत्त्रियुतस्तृतीयद्रेष्काणोपञ्चपुकृत्कर्तव्यस्तप्रनष्टे सूर्योन्तद्रेष्काणस्वामी भवतीत्यर्थः स्व

१० शेष हा । उक्तास्ताजिकरत्नमालायाम् मुशल्लहास्तु: क्रियनक्रजूकलीरपूर्वाक्रियपूर्वकाणमिति एतत् ।

२० पहेशोमाहयादवंशशि: जधनुर्हरयोर्जमुरवास्तमृतास्त्वलिकुलीभस्याश्चकुलीरत: धटमुखावटयुग्मधटामतामं

मकरोदय इति अथ ताजिकभूषणे ताजिकालंकारादौ मुशल्लहेशान्यथैवोक्ताः रवीज्यमन्दास्सितचन्द्रभौ ।

मा: शनिज्ञजीवा: कविभौमचन्द्रा: मुशल्लहेशा ततो मृगेन्द्रात्तुलतुर्द्द रादहि निशि द्युपोर्वैति नैतद्रम्यम् यत

स्तं मरसिंहे नैतेवर्षेशनिर्णयार्थे त्रैराशिकेश्वराउक्ता न तु मुसल्लहेशा: मेषादिचतुस्त्रैराशिकेश्वराविसिता

र्किभृगवोऽहि गरू शशिबुधभौमा निशि शनिकुजगुर्विन्द्रव: सततमिति एते दिनरात्रिविभागोक्तास्त्रैराशिपा

इत्युक्ता वर्षेशार्थमेवेत्युक्तं सज्ज्ञातं त्रै वर्षेशार्थे दिननिशो र्विभागोक्तास्त्रिराशिपा इति तस्मादत्र पूर्वोक्तनवा

शेशा एव मुसल्लहेशा: उक्तं च सुधानिधौ मुसल्लहं नवांशञ्च कथितं ताजिके मते इति ताजिकतिलके पि मु

सल्लहेशाश्च नवांशनाथा: प्रोक्तास्सदा खिन्न करोमकाद्यैरिति ताजिकमुक्तावल्यामपि मुशल्लहेशा नवमां

शपान्ये जगुर्नैते खिदक शास्त्रविज्ञा इति अथ पञ्चवर्गीफलमुक्तं यादवेन स्वकीयगेहादिभवा सुभास्या ।

त्यापारिज्ञाताविपरीतभावा मित्रादिज्ञामध्यफलेषुवर्गाः ५ विशेषवीर्यानयनंब्रुवेहम् अथपूर्वंग्रहबलज्ञाना
र्थंस्थानान्युक्तानि इदानींकस्मिन्स्थानेकियद्बलमित्युक्तं ग्रहज्ञाभरणे त्रिंशन् ३० स्वभेविंशतिरुच्चगेस्यात्तिथिः
१५ स्वहद्देदशकंद्रेक्काणे १० नवांशकेपञ्च ५ भवन्त्यशीतिरेवंसुगाप्ताश्च विंशोपकास्युरिति अथमित्रसं
मशत्रुरूपेमैत्रीचक्रेबलविभागउक्तः संज्ञातन्त्रे स्वस्वाधिकारोक्तबलंसुहृद्देपादोनमर्द्धंसमभेरिभेंघ्रिः स
वंसमानीयबलंतदैक्यवेदोद्धृतेहीनबलःशरोनइति उच्चबलानयनमुक्तंवामनेन नीचोनितोग्रहःष
ड्भाधिकोमण्डल १२ शोधितः शेषस्यांशानव ९ भक्ताबलमुच्चस्यजायतइति अथात्रसामकप्रथमं नी
चघ्नग्रहान्तरंकार्यंषड्भादल्पंयथाभवेत् तदंशाक ९ लवाः स्वोच्चबलस्यात्ताजिकेस्फुटमिति नीचेग्रहः
शोध्योनीचंवाग्रहेशोध्यंशोधितेसतियथाषड्भादल्पंभवतितथाकार्यंतस्यांशानवभक्ताउच्चबलस्याद्विति अ
थाधिमित्रमित्रसमशत्र्वधिशत्रुरूपेमैत्रीचक्रेबलविभागउक्तस्ताजिकतिलके उक्ताः कलाःस्वर्क्षगतेग्रहेन्द्रे
द्रेष्वन्त्येव वर्गेत्वधिमित्रगेहे स्वाङ्घ्र्यंशहीनाहितगेहसंस्थेस्वार्द्धोनिताः स्वाङ्घ्रिलवत्रयोनाः समर्क्षगेशत्रुगृ
होपयातेनिजाष्टमांशप्रमितंबलंस्यात् अधिद्विषद्भोपगतेस्वकीयेनृपांशलिप्ताइतिवर्गवीर्यं यथागंतत्तु

हा· र· १७

वलंतुतेनसमन्वितंवर्गवलंवलंस्यादिति मित्रशत्रुरूपेमेत्रीचक्रेवलमुक्तंपद्धतौ निजमित्रारिभेत्रिंशांशेरं५य १५ स्सार्द्धोद्वयो ७।३० वलम् हद्देतन्नद्दलंत्र्यंशे द्रेष्का णांशेरसांशकइतिन्मंशेनवांशे सनत्स्यष्टमुक्तंतोजि कसारे त्रिंशांशांनिजभेस्वमित्रभवनेपस्तांशकाः १५ शत्रुभेसार्द्धास्सप्तलवाः ७।३० स्वखांगिलंवर्के भागा स्तुपञ्चनूवः१५ त्रिंशांशेनिजमित्रभेनगलवाः सार्द्धाः ७।३० हता: शत्रुभेपादोनाः ३।४५ स्वगुणा ग्नकेद्र लस्लवाः १० वांशांशकामित्रभे द्रेष्काणे सदलायमा २।३० स्वरिगतेनंदांशकेस्वेशराः ५ नंवांशेनिजमि त्रेगेयमलवाः सार्द्धा २।३० स्वरोनद्दल १।१५ मिति नंदैकचतुर्यभागप्रमाणिकावलोत्मिनः दशांशिकेबलो वलीशराल्पकेल्पवीर्यक इति अत्रवामनेनलग्नस्यापिपंचवर्गीकार्येत्युक्तम् स्वोच्चनवांशांकंहद्दाग्टहद्रेष्काणास्वच सत्समखेचराणांतुप्रोक्तोयपंचवर्गीके ति अथवर्षेशदशाधीशनलादिनिर्णयार्थंविशोपकाविभागेननष्टवलाद्विलम्र। रोमुक्तंताजिकसारेवांशांत्ये नेष्टवलोगृहोदश १० मितेर्मध्योविशोपैस्ततेः अष्टो घस्त्र १५ मितैस्सुखायेजनकः प्रोक्तः खदस्रे २० र्भवेदिति ननुदिशांतिविशोप

००	स्व	मि	शे	श
गृ०	३०।०	२२।३०	१५।	७।३०
हृ द्रा	१५।०	११।१५	[illegible]	३।४५
द्रे:	१०।०	७।३०	५।०	२।३०
न·	५।०	३।४५	२।३०	१।१५

कात्मकमेवेलर्द्धं. स्यापि ग्रहस्य नायानि नथाहि मेषस्य सूर्यस्य उच्चवलादि यद्यपि समायाति तथापि स्वगृहत्वा
भावसमशत्रुगृहादिभेदकृतवलतारतम्येनावश्यन्यूनतासार्द्धद्वयविंशोपकमिता भवत्येवस्वंसनिसर्द्धासप्त
दशविंशोपकावलंसिंहस्थ सूर्यस्यस्वगृहवलंयद्यपि समायाति तथाप्युच्चराशेरभावादुच्चवलस्यन्यूनतापां
षोडशविंशोपकावलस्यान्ननुविंशतिविंशोपकात्मकम् अथबुधस्य कन्यायां पञ्चदशांशे स्वगृहवलंस्वो
च्चवलञ्चपूर्णं यद्यपि समायाति तथापि हद्दाद्रेष्काणनवांशवलानि पूर्णानि न सम्भवन्ति यतः आद्यादिमाःष
ड्भागाः कन्यायाम्बुधहद्दा अन्तिमस्त्रिभागो बुधद्रेष्काणः अन्तिममंशत्रयम्विंशतिकलाधिकम्बुधनवांशः यदि
कन्यान्तिमनवांशोगृहस्य तेन दास्वगृहद्रेष्काणस्वनवांशवलानि सम्पूर्णान्यायान्ति

पंचधर्मिमैत्रीचक्रंवलचक्रं					
ख	अधिमि	मि	स	श	०
२० ०	२२ ३१	१५ ०	७ ३०	० १५	गृह
१५	११ १५	७ ३०	३ ४५	० ५६	हृ.
४०	७ ३	५ ०	२ ३०	० २७	द्रे.
५ ०	३ ४५	२ ३०	१ १५	० १८	न.

मित्रशत्रुरूपमैत्री				
ग्र	द्रे	हृ	न	०
२०	१५	१०	५	मि
१५	७ ३०	५ ०	२ ३०	[illegible]
७ ३०	३ ४५	२ ३०	१ १५	[illegible]

परन्त्वेकसन्धिकत्वसतोऽपरं प्रच्यवतइतिन्यायाद्द्वैच्चवलंकिञ्चिदूनं हद्दादिवलमपि
मित्रादिगेहस्थत्वान्न्यूनमतः परमवलंयथाकथञ्चिदष्टादशविंशोपकात्मकंस्यात्र
विंशतिविंशोपकात्मकम्वलमन्येषान्तु गृहोच्चयोर्भेदाद्विंशतिविंशोपकन्यूनमेव
वलंस्यात् अत्र केचित्पंचवर्गीद्वादशवर्गीहर्षस्थानवलानामेकं त्रिभक्तं यदि विंशतिविंशोप

हा० १ २२

कल्मितं स्यात्तदा पूर्णो वलो ग्रहो ज्ञेयः उक्तं च यादवेन श्रीसूर्यवर्गीशरवर्गिकासु स्थानोत्थवीर्यैक्यमथाग्निभ
क्तं चेद्विंशतिः पूर्णो वलो ग्रहः स्याद्वलानुमानेन च मध्यमादिरित्यलमतिप्रसंगेन अथ दशाफलज्ञानार्थं पंचे
विंशोपकन्यूनवलो नष्टवलः पंचविंशोपकात्मकवलः स्वल्पवलः पंचाधिकवलो मध्यवलः दशाधिकवलः पूर्ण
वलः वर्षेशफलज्ञानार्थं तु षड्विंशोपकात्मकवलो हीनवलः षड्विंशोपकाधिकवलो मध्यवलः द्वादशविं
शोपकात्मकं वलः पूर्णवलः स्यात्तत्स्पष्टमुक्तं हिल्लाजेन पंचविंशोपकान्यूनवलो नष्टवलो ग्रहः पंचविंशोपक
वलो हीनवीर्यः प्रकीर्तितः पंचाधिकवलो मध्यवलः संपूर्णवीर्यकः दशाधिकवलो द्देशफलं ज्ञेयमिति भगवान्ः
इति सामान्यपंचवर्गीवलसाधनं अथ खत्तखुत्तखिदकादिसंमतं स्थानदिक्कालनिसर्गचेष्टादृग्वलानि निरूप्य
ते उक्तं च समरसिंहेन सामान्यवलमिहोक्तं विशेषमवलोक्य फलमूह्यमिति तत्रादौ स्थानवले सविशेषं पंच
वर्गीचक्रसूचनमुक्तं तत्प्रयोगे समरसिंहेन सवलीस्वगृहत्रैराशिकहद्दो मुशल्लहेषु वरिष्ठ इति गणनस्य
हंगणितपूर्वकमुक्तं ताजिकमुक्तावल्यां स्वाधीशाद्दोनकैवेदाग्निनेत्रनूपौ हद्दानि स्युर्गृहेकौ १२ हद्दानि तु गो
विदाग्न्यश्विनसप्तत द्दृहद्देणमाद्दोनद द्दोन्यतः स्युः त्रैराश्युन्यद्दोनः द्दोद्दकानि त्रैराश्यद्दं स्यान्मुशल्लाहसंज्ञे॥

पह्वास्वेष्टांशान्तिषु द्वादशांशे गेहादंशाच्च गतयोऽग्निदस्राः रामाश्व्यङ्गनित्रिचन्द्रार्द्धकानि चन्द्रार्द्धांशानूपपूर्वाः क्रमेण
स्फुटे सुहृत्सप्तमात् स्वादिगेहाच्छेषभार्द्धेन्यत्रकल्प्यो नुपातः अभीष्टादिगृहाद्विभ्योवलं यदि हसाधिनेस तेनतद्द्वं

पंचधामैत्र्यांवलविभागः एतान्यंकानि द्वादशोद्धृतानि वलम					
स्वीयवर्गे	६	४	३	२	३
अधिमित्रवर्गे	४	३	२	१	॥
मित्रवर्गे	३	२	१	॥	।
समस्थवर्गे	२	१	॥	।	=
शत्रुवर्गे	१	॥	।	=	
अधिशत्रुवर्गे	॥	।	=	–	।॥
००००००	गृ	उच्च	हद्दा	नेरा	मुस

ड्यानेनिघ्नन्तत् षष्टिभक्तं स्फुटम्भवेदिति अत्रैतर्के वेदाद्यकानि द्वादशांशे तानि
नूपकलादिकम्बलम्भवति अथात्र स्वगृहे पूर्णम्बलन्तु तत्र स्वगृहनगमङ्गादूत्
केः स्वगृहात्सप्तमेराशौ गृहो निर्बलः अन्तरे त्रैराशिकमुच्चवद्रवद्वेयं ओनार्के चेद्
योरेकमेव स्वगृहमतो न संदिग्धम्भौमादीनां तु स्वगृहद्वयसद्भावोऽनन्तरेणन्तेमम।
स्यापिद्वे विध्यात् कथमत्र वलानयनोपायः उच्यते भौमादिषु चारवशात्निकटस्थि
तमेव स्वगृहं न तु दूरस्थितमिति सम्प्रदायसुक्तिरिति अथ गृहं स्वगृहं सप्तमाद्वि
शोध्य शेषं षडधिकञ्चेद्द्वादशशुद्धं नो चेद्यथास्थितमेव स्याप्पन्नतत्सेसांशाः।
षड्भक्ताष्कलादि वलं स्यादिति अत्रोपपत्तिः स्वगृहप्रारम्भे पूर्णन्त्रिंशत्कला।
त्मकम्बलन्तत्सप्तमारम्भे शून्यमन्तरेनुपातः यदिराशिषट्कांशैः १८० पूर्णम्बलं ३० लभ्यते तेनेष्टेन किमिति अत्र
।

हा० त्रगुणाहर्योस्त्रिंशतापवर्तेकृतेगुणस्थानेरूपम्भाजकस्थानेषडित्युपपन्नमेवमधिमित्रग्नहस्यगर्हे पूर्णोर्ववलम

१० २० अधिमित्रगर्हात्सप्तमेशून्यन्तत्राधिमित्रगर्हस्थगर्हेअधिमित्रसप्तमगर्हाद्विशोध्यशेषंषडधिकन्द्वादशाष्टु

२३ दुत्नोचेद्यथास्थितमेवस्थाप्यतस्यांशानवभक्ताः कलादिस्वाधिमित्रगर्हवलंस्यात् अत्रोपपत्तिरनुपातेन यदि

राशिषट्कांशे: १८० पूर्णं २० वलंतदेष्टेनकिमिति अत्रगुणहर्योर्विंशतिभिरपवर्तेकृतेगुणस्थानेरूपंभाज

केनव इत्युपपन्नमेवंगर्हवलेनस्वस्वपरमवलेनस्वस्वसप्तमगर्हेनपूर्ववदनुपातयुक्त्यासोपपत्तिकंवलंस्यात्

सोच्चवलत्वनुपातेनप्रागानीतमेवअधिमित्राद्युच्चेउक्तवदनुपातेनवलंसाध्यंउच्चराश्यभावेस्वोच्चवलमेवैकान्तव्यं

अथगृहाद्रेष्काणनवांशानांसप्तमेनैवेत्यमितिवचनाभावादंशैरेवानुपातस्तद्यथागृहस्यवर्तमानगृहारंभेव

लारंभःगृहमध्येपरमंवलं १५ गृहसमाप्तौवलंशून्यंतत्रगृहगृहभुक्तभोग्ययोरल्पगृहांशाः पंचदशगुणा

वर्तमानगृहांशभक्ताःस्वगृहवलंस्यात् अत्रोपपत्तिरनुपातेन यदिवलस्थानगृहार्द्धांशैः पंचदशकलालभ्यं

तेनदागृहगृहभुक्तभोग्ययोरल्पांशेः किमिति उपपन्नंअथस्वद्रेष्काणप्रारंभेफलोपचयः पंचमांशसमाप्तौपूर्णंव

लं १० दशांशसमाप्तौशून्यंवलंतत्रगृहविद्यमानद्रेष्काणभुक्तभोग्ययोरल्पमंशादिद्विगुणंकलादिवलंस्यात् अ

त्रोपपत्तिः यदि पंचभिरंशैर्दशकलामितं बलं तदैकेन किमत्र पंचभिरपवर्तेन कृते हरस्थाने रूपं गुणस्थाने द्वयमि
त्युपपन्नं अथ मुथशहाद्धारंभे बलारंभः मध्ये पूर्णं बलं ५ अंते शून्यं तत्र ग्रहविद्यमानं मुथशहा भुक्तभोग्ययोर
ल्पमंशादि त्रिगुणितं स्वमुथशहाद्बलं स्यात् अत्रोपपत्तिः यदि मुथशहाद्धे नव शनैरिशत्कलाधिकैकांशा
मितेन पंचकलामितं बलं तदैकेन किमिति अत्र भाजकत्रिगुणो गुणकः अतोंशादि त्रिगुणीकृत्य मितं उपपन्नं
मेवमनुपातेनाधिमित्रादि द्रेष्काणबलं पूर्वोक्तपरमबलेन ग्रहस्य हद्दाद्रेष्काणमुथशहाद्धे बलसाध्यमेवं स्वादिनवां
शस्वादि हद्दायाननं देशेरनुपातात्फलं ज्ञेयम् तत्र हद्दायाम्परमबलं रूपाः १५ मुथशहे परमरूपाः ५ अथस
वंसर्वे बले कप्ड्. हो. परिस्थित्येषाङ्क हारणं यादृष्टयस्समागतास्तदैक्येन गुणितं षष्टिभक्तं स्फुटं स्यात् देवं सविशेषप
ञ्चवर्गीचक्रनितूरस्थानानन्तरमन्यतृस्थानबलमुक्तं तत्रैव समरसिंहेन योलग्नेकेन्द्रवातात्रिकटेवाप्यवीक्ष्यातेन्नपुरु
षागगनाद्यावच्चतुर्थीयभवने स्त्रियोपि नवमान्तम् पुंखेटाः पुंराशौ स्त्रीराशौ स्त्रीग्रहा बलिनः स्थिरराशौ कामभवनितो ते
ऽपि नइति एतावत्स्पष्टाङ्कगणितपूर्वकमुक्तमुक्तावल्याम् लग्नकेन्द्रतदुपस्थितग्रहे रूपा १ कार्द्दे ३।५ चरणिनिमि
तं ४ बलं स्त्रीषु रूपा भवने ४ नवमान्तः पुंसु भावफलतोपरोगेषु स्थिरराशौ सर्वेषां पुंस्त्रीराशौ पुमङ्क. माख्याना

हा मिति अत्र लग्नेग्रहः पूर्णवीर्य्यः केन्द्रे ऽर्द्धवीर्य्यः पणफरायोक्लिमयो श्चरणवीर्य्यस्तत्र पूर्णम्वलंष
१ ष्टिकलात्मकम् अर्द्धं त्रिंशत्कलाश्चरणः पञ्चदशकलाः अथ लग्नसमे ग्रहे पूर्णम्वलं द्वादशसन्धिविरा
२४ मविकलांतोलग्नभावप्रारम्भस्ततस्तद्विरामं यावत्पंक्लोपचयो प्रथमभावविरामविकलांतः प्रथमसन्धिवि
रामं यावद्भावफलोपचयः अन्तरस्थे ग्रहे त्वनुपातः स चानुपातः पूर्वे ऽङ्गहसन्ध्यन्तरं कार्यमित्यादिनाभावफला
नयनार्थं कृतमेव अतो लग्नस्य ग्रहस्य भावफलमेव वलं केंद्रस्थग्रहस्य भावफलार्द्धमेव वलम्पणफरापोक्लि
मस्थग्रहस्य भावफलचतुर्थांशो वलमिति अथ स्त्रीग्रहाणाञ्चतुर्थादिषड्भावेषु वलत्वोक्तेः पुंस्त्वाच
तुर्थादिषड्भावस्थानां स्त्रीग्रहाणाम्भावफलमेव तत्र त्यं वलम् एवम्पुरुषग्रहाणामपि दशमादिषड्भावेषु स्थि
तानां भावफलमेव वलमिति अथ स्थिरराशिस्थग्रहवलं तत्र राश्यारम्भे वलोपचयः पंचदशांशेः पूर्णवलं राश्यं
ते शून्यं वलमतो ग्रहस्य राशिपूर्वार्द्धे स्थितस्य भुक्तांशाः राश्युत्तरार्द्धे स्थितस्य ग्रहस्य भोग्यांशाश्चतुर्गुणा वलं अ
त्रोपपत्तिः यदि पंचदशांशेः पूर्णवलं ६० लभ्यते तदा स्थिरराशिस्थितभुक्तभोग्यैरंशैः किमत्रोभयोः पंचद
शभिरपवर्त्तने कृते अंशाश्चतुर्गुणाः कार्या इत्युपपन्नम् एवं विषमसमराशिगानां पुंस्त्रीग्रहाणां स्त्रीराशिसंस्थ

ग्रहबलंबहुलज्ञेयम् इतिस्थानबलं अथदिग्बलमुक्तन्तत्रैव नवमसहजषष्ठांगायपुत्रान्त्यभस्थाशुभगाःन इह
खेटादिग्बलाढ्याभवेयुरिति अत्रसूर्यादीनांनवमादिस्थानेपूर्वोक्तयुक्त्याभावफलतुल्यमेवबलंज्ञेयं अयमेवग्र
थमेहर्षबलंसमरसिंहेनोक्तं इतिदिग्बलम् अथकालबलम् तत्रसमरसिंहः गुरुमंदौयदिपश्चिमरात्रौ
शुक्रेंदुभूसुताः सायम् उदयंतितदाबलिनोनरगव्हाश्चाह्निनक्तमपरेच अत्रार्कात्सप्तमलग्नोदयः कालः
सायंशब्दवाच्यस्तत्रचंद्रभौममौपूर्णा ६० बलौ अत्रार्काच्छुक्रः सप्तमः कदापिनसंभवत्यतोत्रसप्तमराशेः पर
मांतरखाचीज्ञेयं अतःसूर्यशुक्रयोः परमांतराशेःपंचाशत्संख्येबलंसाध्यं उक्तंचमुक्तावल्यां खेःसेनेम
चंद्रभौमौबलाढ्यौखपंचाश ५० तुलांतरेदैत्यमंत्रीतिसूर्यतुल्यस्त्वेसर्वेपिनिर्बलाः अथबलानयने सूर्य
स्यचंद्रभौमयोश्चांतरं षड्भस्याप्यंतदंशास्त्रिभक्ताबलंभवेत् अत्रोपपत्तिरुच्चबलवत् सूर्यशुक्रयोश्चांतरंपं
चाशदंशमध्येस्यात् तदनंतरमेवतदंशाः षड्गुणाःपंचभक्ताः शुक्रबलंस्यात् अत्रोपपत्तिः यदिपंचाशदं
शैः षष्टिकलालभ्यंतेतदेकेनकिमित्युभयोर्दशभिरपवर्तेकृतेगुणकःषड्भाजकःपंचेत्युपपन्नं अथयत्री
वशान्योरहोरात्रानंतरबलारंभस्तृतीयप्रहरान्तेबलंपूर्णंचतुर्थप्रहरान्तेबलंशून्यं अथसूर्योद्रात्रिसा

नमानीयपद्यद्वैरात्रानंतरमिष्टकालस्तदा तस्मिन्नहोरात्रः शोध्यः पदितृतीयप्रहरोत्तरमिष्टकालस्तरात्रिमा
नमध्ये शोध्य शेषं षष्टिगुणमहर्मानेन भक्तं लब्धं तु शनिबलम् अथदिवसादिनहबलम् तत्र लग्
नमध्ये रविम्बि शोध्यपद्यवशेषं न्यूनं तदा तद्राश्यादि कं विंश गुणास्वलम् अधिकं षट् च्युतम्बिधेयं शेषं
राश्यादि विंशद्गुणं पञ्च हृतानाम्बलम्भवति पञ्चहृतानां रव्यूनलग्नेषडधिके तु नवलमेवं रव्यूनेलग्नेषा
ङ्नेसति स्त्रीग्रहेषु न बलम् षडधिके षड्नंनवाधिकं द्वादशान्यक्तमवशेषं विंशतिगुणं त्रीन् हृद्वीर्य्यं भव
ति यत्कोदिननिशोः पुंस्त्री प्राबल्यमुक्तं संध्यौ तु विरामः एतत्स्पष्टमुक्तमुक्तावल्याम् अर्कोनलग्नेषु यत्र ।
त्रिराशिंयावत्परत्रापचयेनरूपम् पुंस्त्वन्यखेटेषु चयन्नवान्तषड्भात्परत्रापचयेनवेद्यम् अयमर्थः अर्कोन
लग्नेत्रिराशिंयावच्चयतोवृद्धितोरूपम्बलम् त्रिराशितोग्रे अपचयेनरूपं पुंखेटेषुबलम् अन्यखेटेषु स्त्री
ग्रहेषु सप्तमान्नवान्तं यावद्रूपम्बलम् अपरत्रदशमात् द्वादशान्तं अपचयेनरूपं बलं ज्ञेयमित्यर्थः इति
कालबलम् अथनिसर्गबलम् तत्रनिसर्गबलमुक्तं ताजिकप्रदीपे रूपस्य सप्तमांशो ८।३४ बलम्भवेत्सूर्य
पुत्रस्य ततद्व्यादिगुणं भौमज्ञगुरुसितेंद्वर्कजं निसर्गस्यात् इतिनिसर्गबलम् अथचेष्टाबलम् समरसिंहः

मन्दगतिरशीघ्रगतिश्चावक्रः क्रूरदृग्रहितः क्रूरायुक्तोवलवान्शुभयुतदृष्टः कृताभ्युदयः सूर्यस्यचैकभा
गेइति एतत्सर्वमुक्तन्ताजिकमुक्तावल्याम् द्विगुणांशान्रूपोनवीर्यमथार्कांश गानाञ्चशुभसमन्वितस्यवा।
लंक्रूरसहितस्यरूपंस्यात् मार्गोदयार्द्धभागस्थितस्यवाऽशीघ्रगस्यमध्यगतेरिति अत्रसूर्योपदर्शिना।
वांशेतस्मिन्नेवनवांशेस्थितस्यग्रहस्यभागाद्यं द्विगुणांषष्टिभक्तमवशेषंवलंभवति अथशुभग्रहेणस
मानलिप्तस्यषष्टिकलावलंन्यूनाधिकत्वेतुद्वयोरंतरंत्रिंशदंशन्यूनंविधेयंतदंशा द्विगुणांवलम् अत्रशु।
भसहितस्तोयदाक्रूरग्रहसहितोभवतितदानवलमित्य।
पिज्ञेयं अथग्रहस्यमार्गेदिनमारभ्यवक्रपर्यंतंतयोर
ध्ये दिवसमारभ्यास्तपर्यंतंया दिनसंख्यातदर्द्धं विधाय
तावत्संख्येह्निषष्टिकलात्मकंवलंवक्रदिनेऽस्तदिने
चवलंशून्यम् अन्तरेऽनुपातः पदिमध्यदिने पूर्णंशुभ
वलंलभ्यतेतदामार्गेदिनाद्गतेगम्येवीदिवसेस्तथाग्रहोदयदिनाद्गतेगम्येवीदिवसेः किमिति अथोदयास्त

श्री ~	मं	बृ	श
अस्तादुदयः	४	१,	१।७ / १२०
उदयाद्वक्रं	१०	४।७ / १२०	२
वक्रान्मार्गं	२	४	४,
मार्गोदस्तः	१ः	३।१ / २०	२ / १५

०	पूर्वोस्तात्पश्चिमेदयः	पश्चिमोदयाद्वक्रम्	वक्रात्पश्चिमोऽस्तम्	पश्चिमास्तात्प्रागुदयः	प्रागुदयान्मार्गः	मार्गोत्पूर्वास्तम्
बु	दि॰३२	दि॰३२	दि॰४	दि॰१६	दि॰४	दि॰३२
शु	दि॰७५	दि॰ २४०	दि॰२३	दि॰[illegible]	दि॰२[illegible]	दि॰ २४०

हा· वक्रमार्गादिनानां ज्ञानं सुगमोपायेन मदनुचरेणेऽस्मिन्ग्रन्थे चिन्तामणावुक्तम् पूर्वो स्ततः पश्चिमउद्गमोस्माद्धक्र
१· न्ततोऽस्तः परउद्गमः प्राक् मार्गी पुरोऽस्तात्खलु दन्त ३२ दन्तै ३२ र्वेदै ४ र्नृपै १६ र्वेद ४ रदै ३२ र्बुधः स्यात् कृगो।
१६ स्ताद्द्विमास्य ष्टमासे स्त्र्यश्विदिनैःक्रमात् नवभिस्त्र्यश्विदिवसैर्मासेऽष्टमितैस्तथा भौमस्तादुदयस्तस्माद्धक्र
न्नादनुमार्गता ततोस्तः स्ववक्रमतो वेद ४ काष्ठा द्वि २ पंक्ति १० भिः मासैर्भुवो साब्धिवेदै र्युगैस्सांघ्रियुगैर्गुरोः शनेः
स्सांघ्रिभुवांरामैर्वेदैस्सार्द्धैश्ववह्निभिः इत्युदयास्तादिदिनज्ञानम् अथग्रहगतिबलम् तत्रस्वशीघ्रस्य।
कोर्थः स्वगते मध्यमगतिन्यूनस्य स्पष्टगते ग्रहस्य सबलत्वन्तथा मध्यमगते मध्यमगतितुल्यस्पष्टगते ग्रहस्य
च सबलत्वं मध्यमगतितोधिकस्पष्टगते ग्रहस्य बलाभावो ज्ञेयः अत्र भौमस्य गतितुल्याः कलाद्विगुणा।
बलम्भवति बुधस्य गतिकलाः षड्गुणास्सैकोनाशीति ७९ हृता बलं भवति गुरोर्द्वादशगुणाः शुक्रस्य स्वा।
त्र्यंशाः हिताः शनेस्त्रिंशद्गुणाः इति मथितार्थो गुरुसम्प्रदायाज्ज्ञेयः इति चेष्टाबलम् अथ दृग्बलम् तत्रैव
लग्नं पश्यति यावत् वत्तस्य वीर्यं स्यात्ताः शुभदृष्टस्य च पापग्रहतुर्यदृशोनितस्य पादोनम् अत्र ग्रस्य ग्रह
स्य यावतो लग्नस्योपरि दृष्टिस्तावदेव तस्य दृग्बलं अथ शुभदृष्टस्य ग्रहस्य यावती शुभदृष्टिस्ता पादोनावलं स्यात्त्य

रं तु क्रूर तु र्येद्दृष्टिरहितो ग्रहोपेक्षितः तत्सम्भवेन वलमिति वीक्ष्यते लग्नं सवली इति समरसिंहः इति दृग्वल।
म् अथ लग्नादि द्वादशभावसहमानां वलानयनमुक्तमुक्तावल्याम् तन्वादिकानामिह सद्मनां तु पत्युर्वलं स्वै
व वलमादिष्टम् स्वनाथजीवज्ञदृशा समेतं तन्मेषु नृपान्वितमाप्य भेषु चतुष्पदाख्येष्वपि चार्द्धयुक्तं नकीटभे।
किञ्चन योजनीयम् शुभाशुभव्योमगदृग्वियोगयुगांशयुक्तो नमितिस्फुटं स्यादिति विशेषमाह वामनः स्वस्व
स्वामिवलत्वेन ज्ञेयो राशिर्वलाधिकः जीवज्ञयुक्तो दृष्टो वा स्वस्वस्वामियुतेक्षितः दृष्टोदयाः कर्किमृगधनुर्मेषवृ
षाख्यमी शेषाः शीर्षोदया ज्ञेया मीनस्तूभयतस्स्मृतः शीर्षोदया दिनवला श्शेषा रात्रिवलास्स्मृताः द्विराशयो
यलस्या दशमस्याश्चतुष्पदाः वृश्चिकस्सप्तमस्थाने चतुर्थे जलराशयः संध्यायां वृश्चिको राशि र्दिवसे नररा
शयः रात्रौ वलां द्व शेषास्सुरित्थं राशिवलं स्मृतम् इति राशिवलं प्रोक्तं पुराणाचार्यसम्मतम् ५ अथा
ष्टधा ग्रहाणां वलमकलमुक्तं पद्मनाभेन अत्र एकैकं प्रति सार्द्धद्विंशोपकं वलं ज्ञेयं संपूर्णं वलं षड्विंशोपका
त्मकं मध्यमं वलं त्रिविंशोपकात्मकं न्यूनं मध्यमवलं ज्ञेयं तदयाभ्यन्येहानिस्तथा क्लेशो त्यर्द्धेशेको मद्द्र
यं वैमनस्यं तयोर्द्वेगो नृपे प्रोक्तमिदं फलं सार्द्धनृपेतनोः पीडा द्वाभ्यां दुःखं सुखं समं सार्द्धद्वाभ्यां सुखाढ्यं।

त्रिस्त्रिभिर्भोगः सुखं धनं सार्द्धे त्रये सर्वे सिद्धिश्चतुर्भिः सर्वतोयशा इति नष्टबलानां सूर्यादीनां फलमुक्तं।
मेजः सिंहेन त्वग्दृष्टिरुक्परिभवादि रवौ विनष्टे त्वर्थस्य योरति रुजो वनिजे त्व घुत्वं ज्ञे ज्ञानहानिरमुके।
त्ययपुण्यते ज्येषु शुक्रे त्वभोगसुखताद्यगभीः शनौ चेति अगुणृतिरत्ययहृत्तिरयपुण्यतापुण्यर्णहिते अन्न
गभीः स्वशेवकूढ्यं अथ प्रसंगादिष्टकष्ट विचारो लिख्यते तत्प्रयोजनमुक्तं रत्नावल्यां ताजिकोक्तफ।
लादेशः प्रवक्तुं शक्यते यतः इष्टकष्टफलज्ञानान्निर्णयस्तदथोच्यते स्वोच्च १ मित्रोच्चगो २ मार्गी ३ सुहृ
त् ४ सौम्या ५ वलोकित उदितः ६ सौम्यचारी च ७ त्रित्रिकोणाय ३। ५। ९। ११ गोथवा वर्गोत्तमे ९
मित्रवर्गे १० स्वगेहे ११ सूर्यभागगः १२ मूसरिःफो १३ मुथशिलः सौम्यैः १४ सौम्यांतगो १५ युतः १६ एवं
वलयुतः खेटो ज्ञेयः षोडशधा बुधैः नीचे १ शत्रूच्चगो २ वक्री ३ रिपुपा ४ पावलोकितः ५ अस्तगो ६ याम्यभा
गस्थो ७ लग्नाद्रिष्फारिषुस्थितः ८ वर्गोत्तमविहीनोयः ९ शत्रुवर्गे १० स्वहेपिच ११ सूर्यभागोभितः १२।
क्रूरै रिष्फो १३ मुथशिलोपि च १४ पापयुक्तो १५ मध्यगतो १६ ज्ञेयः खेटो वलोभितः इति अत्र शुभस्थान
गिगेहे शुभफलं तूपमितं स्याप्यं अशुभस्थानगे गेहे अशुभफलं तूपमितमस्याप्यपुनश्च शुभाऽशुभफल

योऽन्तरेक्रतेस्ति यच्छुभमशुभम्वा तच्च विशिष्टन्तदेव गम्यम् इष्टकष्टम्वा फलन्दशाफलादिषु ज्ञेयम् एत।
त्स्येष्टकष्टम्मानस्थेन सर्वत्र कल्प्यम्पृथगेव तद्रूपम्फलं शुभाख्यम्फलनिर्णयाय इहापि तद्रूपं परिकं।
ल्प्यसाध्यम्फलन्त्वकष्टाभिधमत्र तद्वैः पृथक्कुस्थितस्यास्यग्रदन्नरालम्फलं तदेवाभिधमत्र वेद्यम्
दशाधि १० के श्रेष्ठफले च पूर्णम्फलन्दशो १० नेकथितन्त्वमध्यम् कष्टाधिके पूर्णशशाङ्क. १० हीने।
शुभे च कष्टे दशतो वरिष्ठे । कष्टान्तया कष्टतरं निरुक्तम्फलन्दशायां यवनैः पुराणैरिति अथ पञ्चवर्गे
भ्य इष्टकष्टमुक्तं ताजिकमुक्तावल्याम् दलन्तुलाद्युन्त्वतदर्द्धकन्त्वस्वकीयमित्रारिगृहे स्वभे स्यान्ते।
तथैव दृक्केऽज्ञल्लवसंदर्द्धनन्तरवराडकन्नन्दलवर्कभागः तदर्द्धकन्तद्दलमेव त्रिंशेति थ्यंशकोर्द्धन्त्व
दलन्त्वथोच्चे नवांशकोर्द्धन्त्व दलन्त्वनीचे शून्यं हि वेदांशनवांशकौ चेति एतदूनं यद्धास्वेष्टास्तिशु।
द्वादशांशा इत्याद्युक्तं वलविभागाशङ्क. इष्टफलसा ध्यम् इतीष्टकष्टविचारः अत्र केचन सामान्येनैवच्छ
हृधावल इत्यपत्तिरुक्तन्त्वहि हित्राजे समगति १ उदितो यः २ सौम्यदृष्टो य ३ युक्तः ४ सशुभमुथशिली
। स्यांत्सौम्यभावे ६ केभागे ७ विचरति शुभमध्ये ८ चातिवीर्यैः प्रदिष्टः कथितवलविरोधी हीनवीर्यः खा।

गेन्दुः उभयबलसमासेचाप्यभावेतयोर्वोविचरति यदिरवेर्दोमध्यवीर्योमुनीन्द्रैरिति अत्रसमभूतिवि
रोधः शीघ्रगतिउदितविरोधोस्तगः एवंसर्वत्रापिज्ञेयं अत्रप्रत्येकंसार्द्धविंशोपकद्वयमितं बलंज्ञेयम् अ
थात्रविशेषफलंजिज्ञासुनापूर्वोक्तंषड्विधमपिबलम्विचार्य्यन्तदभावेसामान्यपञ्चवर्गी। बलंविचार्य्ये
न्तदभावेप्यर्द्धावलम्विचार्य्यमितिसिद्धान्तः अ
थद्वादशवर्गीचक्रमत्रवामनः गृहहोराद्रेष्काणाः
पादांशाःपंचांशषष्ठांशौ सप्तांशनवदशांशा तुद्वांशा
द्वादशांशाश्च भौमशुक्रज्ञचंद्रार्कबुधशुक्रारमंत्रि

गृह			द्रेष्काण			नवांश			त्रिंशांश			उच्च			नीच		
स्व	मि	श	स्व	मि	श	स्व	मि	श	स्व	मि	श	स्व	मि	श	स्व	मि	श
१/२	१/४	१/८	१/६	१/१२	१/२४	१/१२	१/२४	१/४८	१/१५	१/३०	१/६०	१/२०	१/४०	१/८०	[illegible]/०	१/४०	१/२०

णः शौरिः शशिनिस्तथाजीवोमेषादीनामधीश्वराः लग्नार्द्धंजायतेहोरासर्वलग्नेषुसर्वदा ओजराशिभवार्के
न्द्वोःसमेचंद्रार्कजामता मेषादिसर्वराशीनांत्रिभागेषुयथाक्रमं आद्यपंचनवेशानांद्रेष्काणाभणितावुधैः
धैः एकद्वित्रिचतुर्थेषुलग्नपादेषुचक्रमात् स्वस्वराश्यादिकेंद्रेशाःपादांशनायकामताः ४ कुजार्किज्यबुधाः
शुक्रःपंचमांशेषुनायकाः ओजराशिषुयुग्मेषुम्हाव्यत्ययतः स्मृताः मेषाद्याविषमेराशौतुलादिकाः विज्ञे

याविबुधैरेवं राशिषष्ठांशनायकाः ६ ओजराशौ स्वराश्याद्यास्समे सप्तमराशितः सप्तांशनायकास्सर्वे विज्ञे-
याविबुधैस्स्फुटाः ७ मेषाद्याश्चरराशीनां त्वापाद्यास्स्थिरराशिषु द्विस्वभावेषु सिंहाद्याः ज्ञेयाश्चाष्टांश-
नायकाः ८ मेषमृगतुलाकर्कसुखास्तु नवभांशकाः मेषकेशरिधन्वादिराशिचक्रे व्यवस्थिताः ९ आ-
जकुम्भध्वनुस्तौलिसिंहयुग्मक्रमेण तु दशांशनायका लग्ने गृहानेवं विदुर्बुधाः १० मेषमीनघटानक्रचा-
पालितुलकन्यकाः सिंहकर्कटकौ मेषादिका रुद्रांशनायकाः ११ स्वस्वराश्यादिका ज्ञेया द्वादशांशकनाय-
काः १२ एवं लग्नेत्र विज्ञेया बुधैर्द्वादशवर्गिका सूर्यादीनां तु खेटानामीदृश्या द्वादशवर्गिकाः शुभाश्चिमिश्रसौ- श्रा
म्योश्च निन्द्या नीचारिपापजाः एवं फलद्वयं वीक्ष्य तद्विशोध्यं परस्परम् तत्र शेषं यत्फलं ज्ञेयं गृहे द्वादशव-
र्गजम् वर्गे शुभाधिके क्रूरः शुभस्सौम्योऽतिशोभनः निर्व्याधिके शुभः क्रूरः क्रूरोऽतिक्रूरनामभाक् स्वगृहाद्या-
द्वोरस्तेन तद्भावजम्फलम् निजवीर्यानुमानेन स्थितं राशौ शुभावजम् एकैकराशिमध्यस्थं विज्ञेयं रा-
शिमण्डलम् तन्वादिभावरूपेण स्वगृहादिक्रमेण च तेन च द्वादशवर्गस्य स्थूलसूक्ष्मप्रभेदतः स्थूल-
सूक्ष्मं फलं ज्ञेयं गृहाणां सर्वभावजमिति अत्रैकैकराशिमध्यस्थमित्यनेन तन्वादिसर्वभावानां द्वाद

शवर्गिका विधेया तस्माद्भावानां स्थूलसूक्ष्मफलविचारः कार्य्य इत्यर्थः एतत्स्पष्टमुक्तं संज्ञातन्त्रे * ।
भावेषु सर्वेष्वपि वर्गचक्रम्विलोक्य तत्तत्फलमूहनीयमिति द्वादशवर्गीचक्रे विंशोपकानयनमुक्तं * ।
योगसुधानिधौ शतकलाः १०० स्वेमवनादिके च मैत्रेन दद्युःस्व ५० रिपौ न दद्युः २५ नीदेक्यमभ्राज. ६० ।
हृदन्कं वर्ग्यो विंशोपकावीर्यवशतो भवन्तीति अत्र केचन द्वादशवर्गीचक्रं न कुर्वन्ति पठन्ति च वामनेन
ग्रहाणां वा प्रोक्ता द्वादशवर्गिका पुराचार्य्यैरनुक्तत्वात् कृत्तिमासाप्रकीर्त्यैतेनेति एतन्न रमणीयं यतो ।
ति प्राचीनाचार्येण समरसिंहेन भौमः सितो ज्ञ इत्यादिश्लोकदशकेन द्वादशवर्गीचक्रमभिहितम् अत
एव संज्ञातन्त्रे श्रीमन्नीलकण्ठदेवज्ञैर्द्वादशवर्गीचक्रमुक्तमिति इति द्वादशवर्गीचक्रम् अथ ग्रहाणाव
षवलं तत्र चत्वारि हर्षस्थानानि स्थानान्युक्तानि तेजःसिंहेन निधि ९ हुताश ३ षडे ६ क १ शिवा ११ नाज ५ व्य
य १२ इत्थान्प्रथमं खलु हर्षदमस्य खगस्य समयोदितमयस्मृतं निखिलखेटगणोष्टुन्टतीयकं अथ दिनेन्दु
खगास्य तु योषितो भवति रात्रिषु हर्षपदं तथा उदयतस्त्रितयं तु तपंक्रमात् भवति १।२।३।७।८।९ नृणु
सदां च ४।५।६।१०।११।१२ चतुर्थकं अत्र समरसिंहेन द्वितीयकं निजगृहं सर्वेषां हर्षपदं भवतीत्येन ।

नश्लोकार्द्धे नखगृहमेव हर्षस्थानमुक्तं न तु स्वोच्चमिति ज्ञेयं अत्र विशेषकाउक्ताः पद्धतिभूषणे हर्षोवि
नाहर्षपदे पंचविंशोपका मताः हर्षस्थानचतुष्कस्थः खेटः स्यात्पूर्णहर्षितः इति अत्र समरसिंहटीका
यां तु कज्योतिविद्भिरेकैकहर्षस्थाने रूपमितं बलमुक्तम् तत्रापि नवमादिस्थानेषु लग्नाच्चित्रिभेषु च पू
र्वोक्तयुक्त्या गृहाणां भावफलमेव बलं खगृहोच्चबलं तु राश्यंते परमोच्चं तु पोच्चुर्गृहविदो जनाः राभ
श्यंते पूर्णफलदं खगृहं च तथा विदुरिति जीर्णताजिकवचनात् खगृहस्वोच्चस्य गृहस्यांशादि
कं हीनांशा स्वगृहस्वोच्चबलं भवति दिनरात्रिबलं तु पूर्वोक्तं गृहे दिनबलमेव पुनर्गृहाणां त्रिशेष
बलं पृथग्हर्षबलं दिनरात्रिबलं च योजितमेवातो हर्षस्थानद्वयबलं विशेषबलेषु योज्यमिति न
त्वम् सर्वेषां बलानामैक्यं स्फुटबलं भवति स्फुटबलेनैव वर्षेशफलं दशाफलादिकं च ज्ञेयमिति
ध्रुमसन पृथग्हर्षबले धिकहर्षस्थानानि केषांचिद्ग्रहाणामुक्तानि पद्मस्त्वेस्तोव कर्मैव धुधनं चेद्ते
सुखे ज्ञस्योदयं रवेः द्यूनम्भौमस्य धर्मे दृशशने ८ पाद्रुस्सहर्षवेमिति यादवेन तु पञ्च हर्षस्थानान्यु
क्तानि तन्त्राऽग्निनतर्कै शिवेष्विनाख्यास्सूर्यादिकानां स्वगृहं निजोच्चम् पुंस्त्रीखगानां तु नवत्रयं

६ च्चनिशादिनं स्त्रीनरसंज्ञितानाम् पुंभानि पुंसां वनिभागटह्णाणि स्त्री व्योमगानाञ्च दास्पदानि हर्षास्पदे
२ ब्धि ४ विशोपकाश्च एथ्यकर्थकपञ्च सुसम्वदन्ति इति श्रीदेवज्ञवर्य्यपण्डितदामोदरात्मजवलभद्रवि
३९ रचिते हायनरत्ने दृष्टिसाङ्कवलकष्टादानयनाधिकारो द्वितीयः २ अथ षोडशयोगाध्यायो व्याख्यायते
तत्रैकवालादिषोडशयोगानां नामान्युक्तानि ताजिकभूषणे इक्कवालेन्दुवाराख्या २ वित्थशालस्ततः
३ ईशराफ ४ श्चनक्त ५ न्वयमया ६ मणाऊ ७ ततः । कम्बूलङ्गैरि ८ कम्बूल ९ खल्लासरक १० र
द्दे ११ मनोदुःफालिकुत्थश्च १२ दुत्थदवीर १३ तम्बिरो १४ कुत्थश्च १५ दुरुफश्च १६ नेयोगाः षोडशकी।
र्तिताः ताजिकाचार्य्यैर्वर्ष्यैश्च फलविज्ञानहेतवे अथेत्थशालादियोगोपयुक्ताः सूर्य्यादीनां दीप्तांशा उक्ताः।
स्तेजसिंहेन इस्यते अर्के इह पञ्चदशांशे दीप्तके श्चरविभि १२ विधुराः अष्टभि ८ भृगुमृगाङ्कतनूजो सप्त
७ भिर्गुरुशनी नवभि ९ श्चेति ताजिकसारे पि रविशरा ऽब्जे १५ स्तपने: १२ शशाङ्कोत्तवे महीजो वसुभि।
श्च भागैः ज्ञभार्गवौ सप्तलवैर्नभोगे ९ दैवेज्यमन्दो प्रयुनिक्त रोति अत्रपञ्चदशभिरंशैः रविः प्रयुनक्तिम्वस्य
मारो त्थशालादियोगङ्करोतीत्यर्थः एवं सर्वत्र प्रलवैस्सव राहोरपि द्वादशदीप्तभागा उक्ताः अथैकवा

मत्रेक्कवालेन्दुवारयोर्लक्षणमुक्तं संज्ञातन्त्रे चेत्करादके १।४।७।१० पणफरे च २।५।८।११ खलेन्दुवारो । मत्रेक्कवालेन्दुवारयोर्लक्षणमुक्तं संज्ञातन्त्रे चेत्करादके ... यदि खगाः स केलेंदुवारो
गाः समस्तास्स्यादिक्कवाल इति राज्यसुखाप्तिहेतुः आपोक्लिमे ३।६।९।१२ यदि खगाः स केलेंदुवारो ।
नस्याच्छुभः क्वचन ताजिकशास्त्रगीत इति अत्र वर्षप्रवेशे इक्कवालयोगोत्पन्नो राज्यसुखयोर्ले ।
धिः कुलानुमानेन वाच्या वर्षारिष्टेप्यरिष्टभंगो वाच्यः क्वचन वर्षप्रवेशमासप्रवेशादौ यदा केंद्रापो
क्लिमस्था ग्रहाः पणफरापोक्लिमस्था वा स्युस्तदा कोपि योगो न संभवेत् सर्वे ग्रहा द्वित्रिष्वपि केंद्रा ।
दिषु स्थिता योगकर्तारो ज्ञेया इति नीलकंठीटीकाकृत् यादवेनैतौ योगौ अन्यथैव कथितौ ॥ :
केंद्रस्थित द्वित्रयराशिगयोः स्वधाम्नो दृष्टिस्तदा निगदितोत्र स इक्कवालः आपो
क्लिमे पणफरेपि यदि स्थितौ गयोः दृष्टिं केंद्रगं योगस्तदा मुनिवरैश्च स इंदुवार इति द्वयोरेव ग्रहयोः केंद्रपणफर
संस्थयोर्दृष्टौ सत्यामिक्कवालयोगः दृष्टौ सत्यां केंद्रापोक्लिमस्थयोर्द्वयोरेव ग्रहयोरिंदुवारयोग इति
...दृष्टौ ... योगाः संभवंत्यतो यादवोक्त एव पक्षः साधीयानिति चेन्न पक्षोयमस्या
...दृवमते अत्र दीप्तांशैर्दृष्टौ योगाः संभवंत्यतो यादवोक्त एव पक्षः ... अथेन्थशालः तत्र वर्तमानपरि
योगे सर्वे स्ताजिककर्तृभिर्दृष्टस्वभाव उदाहृतोस्ति नीलकंठेनी क्कवालेन्दुवारौ अथेन्थशालः तत्र वर्तमानपरि

पूर्णो भविष्यमुत्थशिलभेदेन त्रिधेत्थशालयोगः तत्र वर्तमानमुथशिलयोगलक्षणमुक्तं ताजिकालंकारे
देहेसत्यां प्रोक्तदीप्तारव्यभागैर्मंदात्खेटाच्छीघ्रखेटो यदाल्पः अंशैस्तुल्यः किंचिदूनस्तदेत्थशालो
योगो मुथशीलः स एवेति अत्रेत्थशालोद्वियोर्मेषुग्रहाराशौ शीघ्रगत्वं मंदगत्वं च स्पष्टगत्या ज्ञेयं अत्र केचित् शीघ्र
ग्रहमंदग्रहयोरेकराशिस्थयोरेव मुथशिलयोगः न नवपंचमादिभिन्नराशौ यतः समरसिंहे न मध्यमाधमक
म्बूलं लग्नो मेषस्थे ज्ञे शनिना कर्कस्थे भूसुवा स्त्रियाङ्क विना मकरस्थेन गुरुणा सह मीनस्थे ज्ञेन न शुभकृत्
निपद्येनैकराशौ मुथशिलयोगोभिहितो न भिन्नराशाविति चेन्न यतस्तेन तत्रैव नीचगयोर्ग्रहयो रित्थशालः

इकतालयोग:

२ सू	१	१२
३	४ बु	११
४ शु	१०	ए
५	७ शं	९
चं ६	ह	८ मं

कार्यनाशकः प्रोक्तस्तद्यथा यदि नीचो नीचेनच मुत्थशिलकारी यथा रिपुद्विष
ता तद्वत्तत्कूलत्वं चन्द्रोपि विनाशको मुथशिलमिति अत्र मुथशिलकारिणो
र्ग्रहयोरेकं नीचं न सम्भवति त्रयाणां लग्नेशकार्येशचन्द्राणां तु सुतरां न स
म्भवति तस्मादेकगृहगयोरेव मुथशिलयोग इति व्याप्तिर्गनेव उक्तत्वं तेज
सिंहेन उक्तांशकान्तरदृग्गुत्यमपीत्थशालः कम्बूलकत्वं पृथगस्यं ग्रहयोर्द्व

इदुवारयोग:

शु २ सू	१	१२ चं रा
३	४	११
५	७	१०
श ६ मं	८	९

योस्स्यादिति अन्ये पुनराहुः राशिचक्रे शीघ्रमन्दस्याग्रे यदा मन्दग्रहो भवति तदेत्थशालयोगोनेनरश्मा एनदा।
ङ्विचारितं रमणीयम् यतस्समरसिंहेन उत्तमोत्तमकम्बूलोदाहरणे रविभौमाभ्यां यथा मेषे इत्यनेन चन्द्रापरे
यदि मिथस्स्वग्रहोच्चसंस्थौ मेषे यथा कुजरवी तदतीवशस्तमित्यनेन च तेजस्सिंहे नापि मेषस्थयोरर्कभौमा।
योः कर्कस्थेन चन्द्रेण सहेत्थशालयोग उक्तः ९ तत्र मेषस्थयोरर्कभौमयोर्मन्दगयोश्शीघ्रगश्चन्द्रोऽग्रे भवति नतु
पृष्ठेन तस्माच्छीघ्रमन्दग्रहयोर्मध्ये अग्रस्थत्वं पृष्ठस्थत्वं च राशिचक्रे यथासम्भवं ज्ञेयम् एनदेवमणऊयुगेष्व
द्विरूक्ससेन रविर्वा शीघ्रस्याग्रे स्थितो यद्वा पृष्ठे परं पश्चात्तु यस्सप्तमदृष्ट्यानत्थैके राशिस्थ इत्यनेन पद्येन समरा
सिंहेन शीघ्रमन्दयोरग्रपृष्ठस्थत्वं यथासम्भवमेव प्रदर्शितं सर्वयोगेष्वपि मुथशिलविचारो ग्रहाणामेकरा
शिगानां भिन्नराशिगानामपि भवत्येवेति स्पष्टमभिहितं च अत्र स्वदीप्तांशे द्वादशांशे वा मुथशिलयोगादयो।
विचारणीया इत्युक्तं ताजिकतिलके स्वदीप्तभागैरविभागकेन्द्रे योगा विचार्या मुथशीलमुख्या इति अ
थाग्रे पूर्णं मुथशिललक्षणमुक्तं योगसुधानिधौ विकलिकाकलिकादलहीनकश्चरखगोल्पजवाद्यवा
ग्रसः मुथशिलं सकलं सफलं तदा फलति तद्यनोमुनिराट्जगौ भविष्यन्मुथशिलयोगलक्षणमुक्तं वाभने

हा० १ १२

न्न राश्यन्तगः शीघ्रगतिः स्थिरस्य भागान्विवस्तुः परराशिगस्य यदा भवेत्तं प्रवदंति योगमेष्यं भविष्यन्फलदं सदै
व सेसरसिंह सुते वर्तमानमुथशिलयोगोयं भविष्यन्मुथशिलयोगोयं भविष्यन्मुथशिललक्षणमुक्तं तेनैव य
द्युक्तभागे तो सोहीं नौ शेमेद दृष्टस्तो भवति तन्मुथशिलं भविष्यज्ज्ञानीयं कार्यसंसिद्धौ अत्रेत्थशालयोगे एष्यस्थे।
शीघ्रे वक्रिणि सति नेत्थशालफलाभावः अग्रस्थे मंदे वक्रिणि सति नेत्थशालफलविशेष इति संप्रदाययुक्तिः व
र्तमानमुथशिलोदाहरणमाह यादवः वृश्चिके भवति भूसुतस्तनौ भाग षोडश १६ इनो हरौ वृषं वासमांश
कमितो तदात्त्यिकाराज्यलब्धिरपरे खिलात्वयं अथ पूर्णमुथशिलोदाहरणं जीर्णताजिके स्त्रीलाभस्य
प्रश्नेकर्के विलग्ने शशी वृषे द्विभागगः साष्टादशकलिकाढ्यः कौर्प्यमं दो द्विभागमितः एकोनविंशति
कलासहितोयं पूर्णफलदः स्यात् अथ वर्षप्रवेशे यदि कोपि पृष्टः छति ममास्मिन्वर्षे स्त्रीलाभो भवि।
ष्यति न वेति एवं विधे प्रश्ने लग्नेशकार्येशयोः परिपूर्णेत्थशाले स्त्रीलाभो वश्यम्वक्तव्यः एवमग्रे
सर्वत्र ज्ञेयम् **अथ स्वस्थानराश्या**दिस्थितग्रहेत्थशालोदाहरणम् वृषलग्नं लाभस्य प्रश्ने कुम्भेन्त्यभा।
गा २९ गस्शुक्रः वेदांशमितो मीने गुरुरेवमुत्थशिलयोगः **अथ भविष्य**न्मुथशिलोदाहरणम् तुला विल

नेभृगुजश्शेरांशेः कर्केंद्रिचन्द्रे क्षितिजोन्यराशौधनस्यलाभेकथितोभविष्यद्योगस्सरवेभाविफ
लप्रदानां अथेत्यशास्त्रेफलनिर्देशप्रकारउक्तस्संज्ञातन्त्रे लग्नेशकार्याधिपतस्सहायायत्रसुर
स्मिन्पतिसौम्यदृष्टे तदाकस्तात्पकथयन्तियोगम्विशेषतः स्ने
हदृशेतिसन्तःसहायानाममित्रम् लग्नेशःलग्नेशमित्रकार्येशः ३
तन्मित्रंस्तेचत्वारोयत्रभावे स्युस्तस्मिन्भावेपतिसौम्यदृष्टेसतिव
लीयोग अथभावदृशासहमतसी
रसुथहाद्देशाद्द्योपियत्रभावेस्युस्त
स्मिन्भावेपतिसौम्यदृष्टेसतितेषां
सवलत्वस्यादितिसमरसिंहवीका
कृत् स्वक्षीदिसत्स्थानगतः शुभेक्षेत्युतेक्षितोभूद्दविनाप्यथास्ते तदा
सुभंप्रागभवत्सुपूर्णोभगेनेमदिष्ठांत्ययवर्तनेच व्यत्यस्तस्माद्विपरीतभा

पूर्णमुथशिलेयो गःस्त्रीलाभप्रश्नः

भविष्यन्मुथशिल योगःधनलाभप्रश्न

वर्तमानमुथशिलोदाहर णं राज्यलाभप्रश्न

प्रकारान्तरेणमुथशिल योगःलाभप्रश्न

हा. वेधेष्टस्ते तोनिष्टगटहम्मुपन्नः अभूच्छुभम्प्रागशुभन्त्विदानींसंयातुकामेनच भाविवाच्यम् अयमर्थः
१. लग्नाधीशः कार्याधीशोवा विपरीतभावेशात्तुनीचादिदुष्टस्थानेषुगतः सन् पापैर्युक्तईक्षितोवाभूत्तदा ।
३३ प्रागशुभमभवत् एवंसर्वत्रसंयातुकाऽनेनराश्यन्तस्थेनशीघ्रेण पापग्रहराशौसंयातुकामेनकृत्वाभवि
ष्यदनिष्टफलंवाच्यमित्यर्थः भावदशादावित्यर्थः अथेत्थशाले विशोपकानयनं दृष्टस्यशीघ्र ।
ग्रहहीमंदग्रहस्यभागैरहिताविधेयाः दृष्टस्यशीघ्रग्रहदीप्तभागाः दृष्टस्यशीघ्रद्युतिभागभक्ताः
फलंयदाप्तंनखसं २० गुणांतद्विशोपकाः स्युर्मुथशीलसुख्येइति उदाहरणं मंदग्रहोभौमो राश्या ।
दिः ७।१६ शीघ्रः सूर्योराश्यादिः ५।१२ अत्रसूर्यस्यांशैः २ भौमस्यांशाः १६ हीनाः १४ एभिः सूर्यस्य
दीप्तांशा १५ हीनाः शेषं १ सूर्यस्यदीप्तांशा १५ भक्तेलब्धं ०।४ नख २० गुणाज्जाताइत्थशालेविंशोपकाः
१।२० अथषोडशयोगप्रान्त्येलिखितयादववृत्तेनावधिदिनानयनं तत्रभौमार्कयोरंशांतरं १४ द्वाद ।
शगुणं १६८ जातान्यवधिदिनानि एवंसर्वत्रज्ञेयं वर्षलग्नेसौम्यग्रहेत्थशालफलमुक्तं ताजिक ।
सारे यदीत्थशालः खचरैस्तुसौम्यैः कृतोहिलग्नेपरिपूर्णकश्च दृष्टेनतदासौविविधंविलासंधनाग ।

मंक्रांतिविवर्द्धनंचेति इत्थशालादीनांफलंजीर्णोनाजिके इत्थशालस्त्वयंकर्त्तायमप्यानक्रम
न्यतः ईसराफः स्वयंहर्त्तोमराऊचान्यहस्ततःखल्लासरैः फलाभावइतिवर्षेविचिंतयेत् अत्ररा
नेकार्यभावेशयोरित्थशालादियोगोन्यत्तोएतत्फलंवाच्यमिति इतीत्थशालः अथेसराफ।
योगः तत्रेसराफयोगलक्षणंताजिकभूषणेशीघ्रग्रहोमंदगतेर्ग्रहात्पुरस्तदेकभागंपुरतः प्र
यातिमन्देसराफस्ततु मूसरीफः पुरातनैर्दुष्टफलः प्रदिष्टः अथशीघ्रग्रहस्यमंदग्रहस्यैकांशा
तिक्रमणेइसराफयोगः एकांशपूर्वोकल्लानामतिक्रमणेपीत्थशालयोगइतिजीर्णेटीकोक्त
त्. अत्रेसराफयोगस्सौम्यग्रहजनितश्शुभइत्युक्तंहिल्लाजे ईसराफेसौम्यजातेकार्यभङ्गोनजाय
तइति अथशीघ्रग्रहोमंदमतिक्रम्यद्वादशांशाभ्यधिकोभवेत्तदापिमूसरिफःशुभफलदएवेत्यु
क्तंयादवेन चरोचरात्स्वरेलेवमुरस्तईराफकः शुभोनमूसरीफकश्शुभोऽर्के १२ भागगस्तुचेत् अ
त्रोदाहरणमाह सएव धनुर्विलग्नेगुरुरष्टि १६ भागैर्बुधोद्रिचन्द्रै १७ मिथुनङ्गतोत्र नकन्यकायाव
रलाभसिद्धिस्स्यात्पिराडतुल्ये २८ त्रबुधेनदाप्तिरिति अथेसराफयोगेविंशोपकानयनम्.॥

हा. पृष्ठस्थमन्दग्रहहीनशीघ्रग्रहस्य भागा नखसङ्गुणाश्च अग्रस्थशीघ्रग्रहदीप्तभागैर्भक्ता विशोपास्तु रिहे
१. सराफे इतीसराफयोगः अथ नक्तयोगः तत्र नक्तयोगलक्षणं संज्ञातन्त्रे लग्नेशकार्याधिपयोर्नदृष्टिर्मिथो
३४ थ तन्मध्यगतो यशीघ्रः आदाय तेजोऽन्यदि पृष्ठसंस्थात्‌ अग्रेस दद्यादन्यत्र हि नक्तमेतत्‌ अन्यत्र मन्दग्रहे
पृष्ठसंस्थाच्छीघ्रग्रहादित्यर्थः अत्र सर्वत्र स्वदीप्तांशमध्ये यदि शीघ्रग्रहान्मन्दग्रहोऽधिको भवति
तदा शीघ्रो मन्दस्य तेजोदाता मन्दश्शीघ्रस्य तेजोहरो ज्ञेयः दीप्तांशमध्ये शीघ्रग्रहान्न्यूनांशे मन्दग्र
हे शीघ्रो मंदस्य तेजोहरः मंदश्शीघ्रस्य तेजोदाता ज्ञेयः वक्ष्यमाणमणाऊयोगे विशेषवाक्याच्छी
घ्रादधिकांशे न्यूनांशेपि मन्दश्शीघ्रस्य तेजोहर्ता भवतीति तत्त्वम्‌ अत्रोदाहरणं संज्ञातन्त्रे स्त्री
लाभपृच्छा मन्तुरस्ति कन्यास्वामी बुधः सिंहगतो दशांशैः सूर्यांशकैर्देवगुरुः कलत्रे दृष्टिस्तयोर्नास्ति
मिथोऽथ चंद्रः चापेदृषेचोभयदृश्यमूर्तिः शीघ्रोर्कभा १२ गैरथवाभवांशैः ११ आदायतेजो बुधतो ददौ
यज्जीवायलाभः परतस्त्रियास्तत्‌ अयमर्थः अत्र लग्नेशकार्येशयोः परस्परं षडष्टगत्वान्‌ दृष्टिर्ना
स्ति अथ शीघ्रश्चंद्रोन्योन्यं बुधगुरुं चपश्यन्त्वस्मादल्पांशाद्बुधात्तेजो गृहीत्वा स्वस्मादधिकांशाय गुरप

वेदद्वैतनस्मांस्परहस्तात्स्त्रीलाभः अत्रस्थानदृष्टिसद्भावेपिदीप्तांशानिक्रमेणनक्तयोगोभवतीत्युक्तं
यादवेन लग्नेशकार्येशखगौनिजभागदृष्ट्याहीनावुभौचरखगोंतरगः प्रपश्यन् नीत्वामहस्सुरगते
रचलप्रापदृष्ट्यान्नक्तंभवेदपरहस्तविलंबसिद्धौ अत्रोदाहरणमाह ससवमीनेविलग्नेगुरुर्कैभमा
स्त्रियाम्बुधौनेत्रलवोनदृष्टिः तयोस्त्वमध्येऽद्रि ७ लवः कुलीरेचंद्रस्तदान्येनसखेंगमान्निशिनिं इति



नक्तयोगः अथयमयायोगः तत्रयमयायोगलक्षणमुक्तंताजिकेभूषणे परस्परंभ
लोकनवर्जितंयत्खेटद्वयंपश्यतिमंदखेटः दीप्तांशकेधामचरात्प्रहीनस्तदास्थिसंयु
दृज्ञेयमयमयाभिधानः अयमर्थः परस्परालोकनवर्जितखेटद्वयंलग्नेशकार्येशाभि
धं तृतीयोमंदग्रहः स्वदीप्तांशे लग्नाधीशकार्याधीशेस्थानदृष्ट्यापश्यन्पृष्ठस्तभयो
मध्येशीघ्रतेजोमीत्वामंद्रगायदतेयमयाख्योयोगस्स्यात् अत्रोदाहरणंसज्ञानतंत्रे राज्याप्तिपृच्छातु
ल्लग्ननाथोमेषेसितस्त्वष्टि १६ लवैर्वृषस्थः चंद्रोरसांशे ६ यदिराज्यनाथोदृष्टिस्तयोर्नास्तिगुरु
स्तुमत्र्यः दिगंशकः कर्कगतस्तुपश्यन्भौमग्रहोदीप्तलवैस्त्रमानृमृदद्दोसितनयेतिपदस्यलाभः मान्यो

हा·
र·
३५

जभावीतिविमृश्यवाच्यम् अत्रलग्नेशकार्येशयोर्द्विद्वीदशाकत्वादन्योन्यदृष्टिर्नास्तिततोयोग्यु
तुर्मन्दगामीकर्कस्योदशांशः लग्नाधीशकार्याधीशौस्यानदृष्ट्यापश्यन्सनस्वत्यांशाद्धिर्नांशो।
स्त्वदीप्तभागैरित्थशालोहरीनत्वावहीशायशुक्रायदत्तेनस्यान्मत्रहारयाराज्यलाभोमात्येनवाच्यः
इतियमयायोगः अथमणऊयोगः तत्रमणऊयोगलक्षणमाहयादवः भौमेवारविनश्वरस्य
पुरतःपृष्ठेयवास्थितःपश्यन्शत्रुदृशा १।४।७।१० स्वदीप्तलववकेहींनेरहीनैरपि यत्कार्यार्थमा
थोक्तमुथशिलतत्रस्थितोवाग्रहोगदलाततीहमहामणऊर्निगदितोयोगोर्थनाशेपटुः मवा

यमयायोगः ८ ७ ६ ९ ५ १० चं १०४ ११ शु १६ ३ १२ १ चं ६	ताजिकेसमरसिंहोपि जातेपियोगरविजोथभौमशशीग्रस्यपृष्ठेथपुरोरिदृष्ट्या स्थि शेर्महस्त्वेकगतस्तुहीनाधिकेश्वसः स्यान्मणऊनशस्तइति पूर्वपद्यस्यापरार्थे भोमंदशनिर्वालग्नेशकार्येशयोर्मध्येशीघ्रग्रहस्याग्रेपृष्ठेवास्थित्वाचतुर्थ सप्तमे कराशिदृष्ट्यापश्यन्सनस्वदीप्तांशेहींनैरधिकैर्वाशीघ्रस्यतेजोगदलालितत्र लग्नेशकार्येशयोरित्थशालेपिकार्यनाशकोमणऊयोगः अथवायत्कार्येनिमि

नंलग्नेशकार्येशाभ्यां यस्मिन्स्थाने मुथशिलं कृतं तत्र द्वयोरेकस्थानगो भौमः शनिर्वा हीनैरधिके।
र्वा स्वदीप्तभागे द्वयोरेकस्य वा तेजो गृहीत्वा।। तिसोमणाऊ योगः कार्यनाशको ज्ञेयः अत्र श्रीहरिभट्ट
दैर्लग्ने कृतं तत्संगृह्य श्लोकः भौमः शनिर्वा मुथशिली मराफवान् शीघ्ररिपुगृहेण लग्नेशकार्यौ
ऽधिपतीत्थशालफलप्रणाशी मणाऊस्तु भोन अत्रोदाहरणमाह यादवः कन्याविलग्नेऽस्मिन्
बुधोऽस्तनाथो दशांशकै रंगिरसादि चंद्रः मीने च युग्मेऽर्कवनिजो भवांशैः एष्टौ बुधस्तेन न चाङ्गवा।

पुनर्भङ्गयोगः

१ १२ ११
२ सू१२ १०
३ ९
४ ६ ८
व ७ ५ बु २ ७

त्रिः एष्टेपि भौमेन नवभिस्तथैव मीनकविर्द्धेस्ति मितोऽत्रपूज्यः नृपेष्वतंत्रार्कसुतो
घांशेनगे ७ श्वएष्टेन हि कार्यसिद्धिः कर्केविलग्नेऽस्ति कविर्दिनांशे १५ हेषभ चंद्रे १
गुः कुजोऽत्र भूपेर्लवे १६ भूमिसुतेन चंद्रो हृतस्ततो नात्र सखेवयेत्वाभ अत्रप्रश्न
मोदाहरणो दशमस्थो भौमो लग्नगं बुधं तुर्यदृष्ट्या पश्यन् बुधादेत्याशादेकेनांशे
नाधिको भूत्वा बुधतेजो हृतो जातः अत्र स्त्रीलाभप्रश्ने कार्येशलग्नेशयोर्गुरुबुध
मारित्यशालेऽपि बुधस्य तेजोहीनत्वान्स्त्रीलाभाभावश्च वक्तव्यः अथ हृततेजः स्वांशेरधीनैरधिके

अमणऊयोगोसाविति विशेषसमरसिंहवाक्येनशीघ्रगनहोऽदुधाद्रल्यांशोमनृगनहोभौमेननवांश
मितोपिवुधते जोहरोजातस्तस्मान्नवांशमितेभौमेमणऊयोगत्वान्स्त्रीलाभोनवाच्य इती।
यो दाहरणोशुक्रसन्योर्भौमेणोज्ञेयः अथतृतीयोदाहरणेलाभत्रस्येककर्कलग्नंतदीशस्यवुद्धोहृषे
दसांशसास्तवक्रुऊः षोडशांशः अत्रमंदोभौमःशीघ्राद्बुद्धादधिकांशस्तस्माद्बुद्धेनेजोहरोजातः
अत्रयद्यपिलग्नेशकार्येशयोरित्थशालयोगोस्तितथापिभौमकृतमणऊयोगत्वाल्लाभोनवा
च्यः एवंमकरराशिस्थानेरप्युदाहरणंज्ञेयं इतिमणऊयोगः अथकम्बूलयोगः
त्रानेकभेदसहितंकम्बूलयोगउक्तःसंज्ञानतन्त्रे लग्नकार्येशयोरित्थशालेचेन्द्रिंन्यशालनःका
म्बूलंस्वेष्टसध्यादिभेदैर्नानाविधंस्मृतम् अत्रलग्नेशकार्येशयोरित्थशालेसतिचेद्रत्रइतीशा
नकार्येशेनाभ्यांवाचन्द्रामुथशिलंकरोतितत्कम्बूलम्॥ अत्रकम्बूलयोगेभेदोपपन्नोस्त्यरदोषचे
वस्थितिरुक्तमोधिकारः स्वह द्रादेष्काणनवांशावस्थितिर्मध्यमोधिकारस्त्रस्तुनीचग्रहावा
स्थितिरधमोधिकारःएतत्त्रितयाधिकाररहित्यंसमोधिकारः यदाहयादवः स्वोच्च

स्वात्तयशालिनोयेदिशशी सोच्चे स्वगेहे स्थितः सुश्रेष्ठनिजतुङ्गगेहरहितोयोगेनदाश्रक्रकं।
स्वत्रैराशिकहद्दभागगतयोर्मध्यम्बिनेभिस्ततोहीनहीनतरञ्चनीचरिपुभेयोग कुरातेतत्वेति
हीनसमहीनतरमध्यममेवञ्चमृस्यलग्नेशकार्येशयोश्चाधिरगवेषणायाम्बूलमु...
त्स्यादिषोडशभेदभिन्नम्भवतीतिज्ञेयम् अथोत्तमकम्बूलस्परणसञ्ज्ञातत्र यदीन्दुस्स्वगेहा
होच्चेस्थस्तादृशोलग्नकार्याधिपौ इत्थशालीकम्बूलम् उत्तमोत्तममुच्यते अत्रोदाहरणं
त्वेवमेषेरविः कुजोवापिकर्कराशिगतश्शशी नचेत्थशालात्कम्बूलमुत्तमोत्तमकार्यदारेशि
अत्रसतान्यत्रेमेषलग्नं लग्नेशोभौमः स्वगेहेमेषलग्नेविंशत्यंशेपंचमभावाधीशोरविः स्वोच्चेमे
षेसप्तदशांशश्चन्द्रः कर्के स्वगेहेचतुर्दशांशः अत्रार्कभौमयोः कार्य्येशलग्नेशयोरित्थशालसं
योगोस्तिचन्द्रोपिद्वाभ्यांसहेत्थशालङ्करोतितेनउत्तमोत्तमकम्बूलञ्ज्ञातम् उत्तमेशो... कार्य।
ङ्करोतिसन्तानप्राप्त्याख्यकार्य्यमवश्यङ्करोतीत्यर्थः अत्रलग्नाधीशकार्येशयो... शिलस
त्वेचन्द्रोद्वयोरन्यतरेणमुथशिलञ्चेत्करोति तदाप्युत्तमोत्तमकम्बूलंस्यादितियादवः अत्रोदा

हरणमाह सएव मेषे ऽगे ऽवनिजो नवांशेर्के इनः सिंहकु भागः १ शशी कर्के पि... नवांशे ... त्वा
वाहि चोत्तमम तुः कवूलयोगः शुभ इति अत्र लग्नेशकार्येशाभ्यां चंद्रो मुथशिलं ... मीति
मुख्यपक्षः अथान्येषां कम्वूलयोगानां संज्ञातं त्रोक्तं त्वत्सरणानि स्वकृतेनोदाहरणसहितानि लि
ख्यंते तत्रोत्तममध्यमउत्तममसमयोर्लक्षणे स्वीयहद्दाहकारणांकभागस्थेनेत्यशाल्मत· मध्यमोत्तमक
वूलहीनाधिकांनिर्नोत्तमम् अत्र पदीदुःस्वगृहोच्चस्थस्तुल्यनुवर्त्तनेहीनाधिकांतिनात्रिविधमधि

मणऊ योगः

मणऊ योगः

कारहितेनकोथेः समसागृहहद्दादि ।
स्कारणानवांशस्थेन लग्नेपेन कार्यपेन
अत्रोदाहरणे भाग्यपक्षे तुलालग्नं ।
स्वहद्दायां दशांशकः १० दशमे संस्थि
तः शुक्रो भाग्यपो ज्ञश्च सप्तमे शक्रांशः

मणऊ योगः

उत्तमोत्तमम्

१४ स्वीयहद्दायां चंद्रः कर्के नवांशकः ९ योगेऽत्रपारणांकंवूलप्रोक्तमुत्तममध्यमम् स्वनामसदृशांज्ञेयं पृष्ठो

कंबूलजंफलं स्वंस्वस्वनवांशेतु गतयोर्लग्नकार्ययोः स्वगेहोच्चगतस्येंदोर्ज्ञेयोयोगः स[illegible]वहि रा न
ज्यप्रश्नेयुग्मलग्नं ३ बुधः कार्येशो[illegible]गं ७ शकः समस्यज्ञस्यगेहेतुकर्केपंचांशे ५ शकः शशी कंबूलमुसमु
सप्तमं त्रयाणामित्थशालतः अथोत्तमाधमकंबूललक्षणं उत्तमाधमतानीचरिपुगेहस्थितेन चेन्[illegible] त्रा
पि पूर्वदीनुस्वगेहोच्चस्य इत्यनुवर्तते उदाहरणं प्रश्ने स्त्रीलाभसंज्ञे तु तुलालग्न स्व[illegible]गेर्ब्वः सिंहे[illegible]
वतीर्णांशेऽष्टशांशस्स प्तमाधिपः कुजस्स्वनीचे सूर्यांशो मिथु: कर्केनवांशकः त्रयाणामित्थशालत्वात्क
म्बूलन्त्वोत्तमाधमम् अथमध्यमोत्तमकम्बूललक्षणम् स्वगृहहद्दादिगतश्चन्द्रं स्वभोच्चस्येत्थ[illegible]
त म[illegible] मध्यमोत्तमेतेच्च पूर्वस्मान्नविशिष्यते पूर्वस्मादुत्तममध्यमकम्बूलात् उदाहरणम् मीनवि
[illegible]लाभके प्रश्ने तुलालग्नन्तुलोपगः शुक्रो धनांशे १७ जायेशोऽष्टत्र्यंशो मेषगः कुजः स्वनवांश
गतश्चन्द्रो मेषहद्दाद्रेष्कांशकः त्रयाणामित्थशालत्वात्कम्बूलम्मध्यमोत्तमम् अथमध्यमध्यम
कंबूललक्षणं स्वगृहहद्दादिपदस्थेन कम्बूलम्मध्यमध्यमम् अत्रस्वगृहहद्दादिगतश्चन्द्र इ[illegible]तेने उ
दाहरणम् पुत्रप्रश्नेयुग्मलग्नंज्ञस्तुलायांनगः शकः स्वहद्दायांस्थितश्शुक्रः पञ्चमेशो[illegible]शेषकः
अत्रै

हा· १· २८

मिथुने स्वीयहद्दायाम्विधुर्जूके नगांशकः स्वत्रिभाग
गतो योगे कम्बूलम्मध्यमध्यमं योगे इत्थशालाख्य
स्यथमध्यमसमकम्बूललक्षणम् मध्यमंसमकं
बूलंहीनाधिकत्रिखेटजम् अत्रापिस्वगृहादिगा
श्चेदित्थशालमनुवर्तन्तु उदाहरणं वृषलग्नंसुतप्रश्ने
मृगे वेदांशकः सितः समस्य ज्ञस्य हद्दायांमुनेशो
ज्ञः अंशकः तुलायांसममंद्र स्वहद्दास्थोजूकगः
शर्म रामांशः स्वत्रिभागेतु दं बूलं मध्यमंसमं अथ
मध्यमाधमकंबूललक्षणं मध्यमाधमकंबूलंनीचा
रिमगखेटजं अत्रापिस्वहद्दादिगतश्चेदित्थनुव
र्तेते उदाहरणं भाग्यप्रश्ने मेषलग्ने भौमः कर्के नवां

८ / ९	७	६ / ५
१०	उत्तम मध्यमं	स्वहद्दा शु॰ चं॰ २
११ / १२	बु: १४ स्वहद्दा	३ / २

४ चं५ / ५	३	२ / १
६ / ७·९	उत्तम समम्	१२
७ / ८ बु७	९	११ / १०

नवांश

[illegible]	[illegible]	शु १० / ५
१०	उत्तमा समम्	मं १२ चं·९
११ / १२	१	[illegible]

मध्योत्तमम्	मध्यममध्यमम्	मध्यमसमम्	मध्यमाधमम्
८ ७ ६ ९ शु २७ ५ १० ४ ११ चं १ म १२ १२ १९ ३ २	४ ३ २ ५ शु ८ १ ६ १२ ९ बु ७ ११ ८ १०	३ २ १ ४ १२ ५ ११ ६ ८ शु १४ ७ ९	२ १२ ३ ११ ४ ७ २ १० मं ६ चं ५ ९ ६ ८

शकः गुरुर्भाग्याधिपो नीचे मकरे च दशांशकः स्वद्रेष्काणगतश्चंद्रस्तुलायां पंचभागकः त्रयात्रिंशि
त्वशालत्वात्कंबूलं मध्यमाधमं अथ समोत्तमकंबूललक्षणं इंदुः पदोनः स्वस्योच्चस्थितेनाप्युत्तमं मा
तुततत् अत्र पदोने द्विविधं एकं तावद्गृहाणां समगृहसमहद्दासमद्रेष्काणसमनवांशगते
म् द्वितीयं सूक्ष्मप्रतिविकल्पात्समगृहहद्दाद्रेष्काणनवांशानामादौ प्रांते वा वर्तमानत्वमिति जीवो
टीकाकृत् उदाहरणम् धनेलाभाभिधे प्रश्ने तुलालग्ने [illegible] भार्गवः तुलायां नगभागाश्च धनेशो मकरे
कुजः नवांशे मिथुने चंद्रो स्वहद्दायां शरांशकः इंदोः समोत्तमः कंबूलं योगे प्रोक्तं समोत्तमम् ९ अथ
समसमकंबूललक्षणं स्वहद्दादिगतेनापि पूर्ववन्मध्यमुच्यते अत्रापि इंदुः पदोन इत्यन्ये एवं तो
ति उदाहरणं धनप्रश्ने तुलालग्ने शुक्रः सिंहे दशांशकः स्वहद्दायां धने धीशो भौमस्तथापि दिगंश
कः स्वहद्दायां त्वमिथुने समशुक्रस्य हद्दगः विधुर्दशांशो योगेस्मात्कंबूलं समध्यमम् १० अथस
मसमाख्यं मध्यमकंबूललक्षणं पदोनेनापि मध्यं स्यादिति युक्तम्प्रतीयते अत्रेंदुः [illegible] रन्यत्तु
वर्तते पदोनेन द्रेष्काणादिसंधिस्थेन लग्नेशेन कार्येशेन च उदाहरणम् द्रव्यप्रश्ने मेषे [illegible] भौम
आने

हा॰
र॰
३९

स्सिंहे धनाधिपः भृगुर्घटे विधुर्जूके त्रपश्वामीर्दिगंशकाः द्रेष्काणास्तन्धोसंस्थित्यजातास्त्वोमे[illegible]दोनिताः समं
समस्त्वकस्थूलस्त्रोक्तन्तदित्यशालतः अथसमाधमकस्थूललक्षणम् नीचारिस्थेनेत्यशाले [illegible] स्थूलमुच्च
ते अत्रेन्दुः पदोनइत्यनुवर्त्तते उदाहरणम् पत्रप्रस्मेयुग्मलग्नम्बुधो मीनेनवांशकः सुतेश[illegible]कन्यकायास्त्वद
ंशांशे नीचगो गुरुः समस्म्य ज्जस्यद्रेष्काणे चापे चन्द्रश्शरांशकः त्रयाणामित्यशाल[illegible]स्थूलस्त्व समाधमा
मं लक्षणम् मोत्तमकस्थूलेलेक्षणम् नीचशत्रुभगस्त्वन्तुस्स्वभोच्चस्थेत्यशालहत्तः अधमोत्तमकस्थूलमि
ति उदाहरणम् सुस्व[illegible]लग्ने सिंहलग्ने रविः सप्तांशकः क्रियेऽसुखेशो मकरे भौमोनवांशो वृषिके शुक्रांशे [illegible]

स्वरूपाणां पो
गे तु कस्थूल
मधमोत्तम
म १३ अथा
धमम ध्यम

समोत्तमम ९ | समम्मध्यमम १० | समसमम ११ | समाधमम १२ | धमोत्तमम १३ | धममध्यमम १४ | धमसमम १५

कंबूललस्सणम् स्वहद्दादिगनेन चेत् इत्यशाली कंबूलंतदुच्यते ऽध ममध्यमम् अत्रनीचशत्रुभगा
श्चन्द्र इत्यनुवर्तते उदाहरणम् पुत्रप्रश्नेलग्नालग्नंस्वहद्दायांमृगेबुधः रामांशः पुत्रपोमन्दः स्वहद्दांशस्य
राशकः मीनेवृश्चिकगश्चन्द्रस्त्र्यंशपोतु योगतः प्रोक्तंचाधममध्यंतु कंबूलंशास्त्रवेदिभिः अथाधमसम
कंबूललक्षणं पदोननेत्यशाली चेत्कंबूलंत्वधमंसमम् अत्रनीचशत्रुभगश्चन्द्र इत्यनुवर्तते उदाहरणम्
वृषलग्नं राज्यलाभप्रश्ने सिंहेगतः सितः समस्यार्कस्य शरांशे राज्यपः शनिः वृषे तमस्य तु स्वं
गेहे मित्रांशकः चन्द्रो वृश्चिकगस्त्र्यंशस्त्यारणमित्यशालिनः कम्बूलंचाधमसमं प्रोक्तं ताजिकवेदि
भिः अथाधमाधमकंबूललक्षणं नीचारिभस्थखेटेनीचारिभगतः शशी इत्यशाली
कंबूलंतदधमाधममुच्यते उदाहरणम् पुत्रप्रश्ने धनुर्लग्नं मृगेवस्वंककोगुरुः कर्कोसुता
धिपोभौमः पंचांशे वृश्चिके शशी त्र्यंशस्त्वपारांयोगेतु कंबूलमधमाधमं १६ कंबूले विशेष
उक्तः संज्ञातंत्रे लग्नकार्यपयोरित्यशालेऽत्रकोस्तिनीचगः स्वक्षादिपदहीनोन्योत्रेंदुः कंबू
लयोगकृत् तत्रकार्याऽस्पताज्ञेयापययाज्ञान्यन्यमर्थयेत् अन्यजातिः पुमानर्थं तथेनन्त

अधमाधमम १६

११	९	३
	६	५
२	७	४ ५

वयोविदुरिति अथ कंबूलयोगे विंशोपकानयनम् निशेशलग्नेश्वरयोर्निशेशकार्येशयोः कार्येशपा
लग्नयोश्च विंशोपकास्संमिलितास्त्रिभक्ता विंशोपकास्ते कथिताः कंबूले इति श्रीरामदैवज्ञगुरुपा
दाज्ञाभेत्तितः कम्बूलमेदरसहितमवलभद्रेण निर्मितम् इति कम्बूलयोगः अथ गैरिकम्बूलम् न
ऽगैरिकम्बूलमुत्सरमाह यादवः जातेन्थशाले त्युभयोरदृष्टिस्थाने चरन्ती [illegible] चेत्तयोस्तु प्रविश्य
क [illegible] ग्रहेन्दो च दृ यदि युतिर्गैरिकबूलमुक्तम् व्रतिविनैतंफलनतस्स मानदृ स्वूलयोगस्य नथैव मे
दैः तथाहि गेहन्निनिगोऽदृ [illegible] यदा तदा निष्फलकंबूलम् [illegible] कार्येशयोर्युतिमित्थशालश्चंद्रे स्थशाला [illegible] स्थित
स्य ग्रहमुच्चवान भवति तदा निश मित्यर्थः उक्तञ्च पारसीकास्तु द्वारे नत्वेरगेह तुङ्गस्थानस्याद्यपि च च
न्द्रमा गैरिकम्बूलयोगोसाधमद्भः कथितो बुधैः अत्रोदाहरणं संज्ञातन्त्रे लग्नेसुखमिति प्रश्नेसिंहा
लग्नं रविः क्रिये अष्टांशेस्सुखप कुम्भे भौमोंशे रविमिस्तयोः इन्थशालोस्तितत्रेन्दुः कन्यायाञ्च
मंशाके स्वस्योदिपदहीनस्य नेन्थशालोस्तिकस्य चित् स स्वोच्चगेन शनिनाऽन्यस्यस्थेनेन्थशालस्तत् गैरिकम्बू
लमन्येनसाह्याप्याहुर्नाभदायकं [illegible] इति गैरिकम्बूलम् अथ खल्लासरः तत्र खल्लासर योगे लग्न राम

प्राप्तवः द्वयोरर्थके नच शीतभानुरद्दष्टिमार्गे विचरन्करोति नत्थं मूथशीलं न च संयुतिम्वा खल्लासरः स्या
त्पहरस्तदास्यात् अत्र लग्नेशकार्येशयोरपि मुथशिलाभावो ज्ञेय इति केचिदाहुः लग्नकर्मतस्तुर्वैः प
खल्लासरफलं कार्यनाशकमित्युक्तम् तत्र लग्नेशकार्याधिपयोरित्थशालाभावे कार्यप्राप्तिरेव न
जाता तत्रैकार्यसम्भवः खपुष्पादिसमस्तयोरित्थशाले कार्यप्राप्तिसम्भवे पिलग्नपकार्यपाभ्या
न्चंद्रस्य युतीत्थशालासम्भवात्के भद्रुमयोगवदित्थशालमपि नाशकः खल्लासरयोगो ज्ञेय इति सत
त्स्यष्टमुक्तं जीर्णत्वाजिके लग्नेशकार्याधिपयोरित्थशालो न वा युतिः द्वाभ्यां चन्द्रोनेत्थशालीत्राफल
खल्लासरसंभवः उदाहरणम् अपत्यसुतमिति प्रश्ने सिंहे लग्ने रविः क्रिये वेदांशेस्तु नपः
जीवः कुंभे शेषास्सम्मितैः लग्नकार्यपयोरस्ति योगो मुथशिलाभिधः अथ कर्म्मा नि
मेशोच विधुर्मुथशिलोनहि द्वाभ्याञ्चनेनकार्यस्य नाशी खल्लासरोमतः इति खल्लासरः
अथ रद्दयोगः तत्र रद्दयोगलक्षणमुक्तं योगसुधानिधौ वक्रेण द्युमरीकराभिगामिना
स्तेप्राप्तनव्यय १२ रिपु ६ नाश ८ गामिनाच क्रूरेणाक्रमितेनभस्सदेन्त्थशालन रद्दं हर

[illegible] लग्नम्
५ ४ ३
६ २
७ १
८ ११ १०
९ १२

तिफलं प्रहर्षणीयम् अत्र विशेष उक्तस्ताजिकभूषणे आपोक्लिमस्थश्च खचरश्चेत्केन्द्रस्थमन्देन च
मूथशीलम् करोति कार्यं प्रथमम्विलम्बम्प्यश्चादवश्यं सकलार्थसिद्धिम् केन्द्रस्थितश्शीघ्रगतिः करोति ।
आपोक्लिमस्थेन च मूथशीलम् मन्देन कार्यम्प्रथमञ्च भूत्वा प्रान्ते विनाशं समुपैत्यवश्यम् अत्रोदाहरण
म अत्रोदाहरणेषु प्रश्ने मेषलग्नम्भौमः कन्यागतो गुरुः भाग्यपस्तत्रैव संस्थितो रविमन्दगो
सर्वे दिग्प्रमिता होपफलनोशकः वा तल्लग्ने मीनसंस्थः कुजो मकरगो गुरुः ह्योदिंगंश प्रागशुभं शुभं ।
पश्चात्कीर्तितं वा तल्लग्ने कर्कसंस्थो भौमो मीनगतो गुरुः ह्योदिंगंशौ प्राक् शुभं स्यात्पश्चादशुभमेवं २ ।
निरर्दश्च यदुःफालिकुत्थयोगः न च दुःफालिकुत्थयोगलक्षणन्ताजिकभूष ।
णे मन्दस्स्वगेहे यदि वा निजोच्चे शिके वापि निजे प्रकुर्यात् योगं च पूर्णानधि ।
कारिणां चेद्दुःफालिकुत्थम्शुभदं त्रिरुक्तः योगस्तु मुथशिलाख्ये येऽधिकाररहि
तेन शीघ्रेण मुथशिलं कार्यकरन्त हिं अधिकारसहितेनाप्यवश्यं कार्यकारमि ।
तिं जीर्णटीकाकृत अत्रोदाहर णम् सुखप्रश्ने मेषलग्नम्भौमस्सूर्यो शकः

खल्लासरः

२६ योगः

क्षिये दिगंसकस्सुखाधीशो हि मांश्रु कुंभसंस्थितः द्वयोरत्रेत्यशालत्वा त्सुखलाभश्चविनिर्दिशेत् इति दुःफालिकृत्यः अथ दुत्थोत्थदवीरयोगस्त त्र दुत्थोत्थदवीरयोगलक्षणमुच्यते ताजिके लग्नेशकार्याधिपती नि र्बलौ योगकारकौ तयोरेकस्स्वगेहोच्चादिस्थेनान्येन योगकृत् इत्थदवीर योगोन्यसाहाय्यात्कार्यकारकः अ थवान्यैं गेहे स्वस्मात् दिगोशी च गतौ तयोः निर्बलेन च मन्देऽमूथशिलकरौ नदा दुत्थदवीरयोगोन्यसाहाय्यात्कार्यकारकः तयोर्लग्नेशकार्येशयोः उदाहरणम् जायाप्रश्ने सिंह ल ग्ने तुलाया प्राशे रविः शनिर्मेषे नव भागः कुजो मेषे रसांशकः शनिस्स्वगृहसंस्थे भौमे नमुथशील कृ त जायालाभोन्यसाहाय्यादुत्थदवीरयोगकेवा तत्र लग्ने सूर्य भौम मंदाः पूर्वोक्तवत्स्थिताः मेषे जीवः स्व ह द्दायां पंचांशो गुरुभूमिजो मंदेन योगकर्तारावनो लाभोन्यनः स्मृतः अत्र स्वगृहगो भौमः स्वहद्दायां गुरु सोस्वनीचस्थेन निर्बलशनैश्चरेणेत्यशालकरावतः स्त्रीलाभोन्यतोवाच्यः इति दुत्थोत्थदवीरयोगः अथ

प्रागशुभपश्चाच्छमेरद योगः

२	१	मं ११
३		११
४		श ११ १०
५	७	९
६		८

प्राकच्छभमपश्चाद २७भ ३योगः

२	१	११२११
३		११
४ मं १०		१०
५	७	९
६		८

दुःफालिकुत्थः

दुत्थोत्थदवीरयोगः

